७

1

॥सुंदरलहरी॥

प्रारंभ

श्रीविघ्नहर्त्रे नमः॥ ॐ नमः। वंदे महामहिमहीयांसमंसलंबिजटाधरं। यत्कंकणश्यपाकाररवः शब्दानुशासनं॥१॥ शेषाशेषाक्तिभृ षाशर्ण
नरणकर्णग्रंथसौगंध्यजिघ्राऽऽद्रोक्तिभाद्धि विलसद्गुरुगुरुगुरुगीर्गुंफसंदर्भितांः। निःशंकाः शंकरोक्तोपशुपतिमतनिर्वाहकाः
सांख्यसांख्याय सश्रीलाललक्ष्मीधरविबुधमणयोऽनिवार्यप्रपंचाः २ सत्यं लक्ष्मीधरः प्रौढकांत्यलक्ष्मीधरादिभ्यां। एतेषां समाहितं
स्वांताः सर्वतां संतनंतु धाः ३ स्यादेवमेतन्नतया मतिमांद्यतो वा दोषः क्वचित्क्वचिदथापि न काऽपि शंका। नैसर्गिकी खलु गुणाकरणप्र
वीणाशक्तिः सद्यो विलयनं खलु सज्जनानां ४ इह खलु शंकरभगवत्पूज्यपादैः समयनत्वव्दितेनः समयाख्यां वेदकल्पं शतेन श्लोकेन
प्रस्तुवंति। शिवरति। शिवः सर्वमंगलोत्पन्नः। वशकांताविलसत्वाद्धातोः शिवशब्दोनिष्पन्नः। यथोक्तं। हिंसाधातोः सिंहशब्दो वशकांताविति
वश्मनः। वर्णव्यत्यये यतः सिद्धो पश्यकः कश्यपो यथा। वशकांतौ विलसंधातुर्मुन्यादिरादिभ्यः संगृहीतः। तुमाद्यैः स्वभावैरिति धातुभिः कांतिः
अपादिवर्द्धिशिकामनार्थमिच्छा। अस्याश्रयत्वाद्भ्यस्य शिवत्वं। शव निम्प्रकाशते स्वयं प्रकाश इति। यद्वा स्वस्मिन्प्रपंचं प्रकाशयतीति शिवः
यद्वा शीङ् स्वप्न इति धातोः शिवशब्दो निष्पन्नः स्वप्नं क्षपयतीति शिवः जाड्यरहितः। अविद्यानिर्मुक्त इत्यर्थः। यद्वा स्वप्नः अविद्या तां वाति
गच्छतीति शिवः सदा व्यक्तत्वास व्यलिप्तः इत्यर्थः। एतस्य शिवपदवाच्यत्वं वक्ष्यते। ईशः शिवः शक्त्या जगन्निर्माणशक्त्याद्युक्तः अवच्छिन्नः
अविद्यायुक्तेन नस्य वृथाक्षणो जगन्निर्माणशक्तिरिति। यदि भवति भवति। शक्तेः समर्थः प्रभविष्णुः जगन्निर्मातुं न वेद्वं शक्त्यायु शिव
क्तश्चेत्प्रभवितुं नेदितिस्यर्थः। ... इत्यर्थः। संदिग्धं वलितुं मपि नितकारस्याका

शतुल्यमस्य स्पंदनायोग्यत्वमिति हृद्गतार्थः। वाच्यार्थस्तु शिवशब्देनाकार्यापत्तिन्यायेन व्याप्यपराशक्त्यायुक्तत्वेन प्रपंचरूपसंतानं निर्मातुं शक्तो
भवति। तथा वियुक्तत्वेन शक्तुं पारिमिति। आगमरहस्यं तु शिवशब्देन नवयोन्यात्मकचक्रमध्यचतुर्योन्यात्मकमर्धचक्रं शिवशब्देन शक्तिश-
ब्देन पंचयोन्यात्मकमर्धचक्रमुच्यते एवं मर्धद्वयमीलितं नवयोन्यात्मकं चक्रं भवति। एतस्माच्चक्राज्जगदुत्पत्तिस्थितिसंहृतिर्भवति पुरस्ता-
द्वर्णयिष्यते। चतुर्भिः शिवचक्रैः शक्तिचक्रैः पंचभिः। शिवशक्त्यात्मके यंत्रे श्रीचक्रे शिवयोर्वपुरिति। शिवशक्त्योर्मेलनं षड्विंशं सर्व
तत्त्वानीतं तत्त्वांतरमिति पुरस्ताद्विवेचयिष्यते तस्मान्मेलनाद्भवजगदुत्पत्तिस्थितिलयाः तत्त्वचक्राद्भवंतीति वक्ष्यते। तथा चोक्तं वामकेश्वरे

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पंदितुमपि। अतस्त्वामाराध्यां हरिहरविरिंच्या-
दिभिरपि प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥१॥

रतंत्रे। परोऽपि शक्तिरहितः शक्त्या युक्तो भवेद्यदि। सृष्टिस्थितिलयान्कर्तुमशक्तः शक्त एव हि। एतद्वचनं तु र्डिः श्रीकंठेरिसादिश्लोकव्याख्या-
नावसरे निपुणतरमुपपादयिष्यामः। अतः अस्मात्सेतोः त्वां भगवतीं आराध्यां आराधयितुं प्रणयितुं महीं हरिहरविरिंच्यादिभिः हरिः
विष्णुः हरः शिवः विरिंचिर्ब्रह्मा चतुर्मुखः। आदिशब्देनेंद्रादयो गृह्यंते अधिकारिपुरुषाः प्रपंचानेः पालिनः तेन नमस्कार्यत्वं। प्रपंचे भग-
वत्याः भगवत्याः युक्तं अतः त्वामाराध्यामिति नेतारोपकल्पितिरिति ध्येयं। यद्वा निगमाः वासोऽतं निगमवेद्यत्वात् भगवत्याः तदुक्तं श्रुतौ
नामरूपादि प्रपंच्यते। विरिंचशब्दः अकारांतः अपि पदः कथमसहायभूपरकाशि। प्रणंतुं नमस्कर्तुं प्रशब्दः आधिक्यवाचकः जितनयशावकः। स्तोतुं को

वक्तुमुनिमात्रं कर्तुं वा अकृतपुण्यः पूर्वजन्मार्जितपुण्यरहितः । प्रभवति ईष्टे । अत्रैवं पद्ययोजना । हे भगवन् शिवादेवः शम्याप्रुक्तोऽपि यदि प्रभवितुं
कः एवं न वक्तुं संक्षिप्तमपि कुशलो न खलु अतः हरिहरविरिञ्चादिभिरपि आराध्यं त्वां अकृतपुण्यः प्रणन्तुं स्तोतुं वा कथं प्रभवति । २ । नतीयांस
मिति । नतीयांसं स्वल्पं पांसुरजःकणं न वयं वयसा चरणपङ्करुहद्वंद्वं चरणपङ्करुहयुगनाभ्यां भवविरिञ्चिः अस्माकं अरातिः विरिञ्चिश्च विरिञ्चि
ः स विरिञ्चिरिति अपरोक्षः । संचिन्वन्त् संपादयन् विरचयति विधानं करोति । लोकान् लोकयन्ति लोकाः स्थावरजङ्गमात्मकप्रपञ्चं । यद्वा
ऊर्ध्वलोकाः सप्त भूरादयः अधोलोकाः सप्त अतलादयः । अविकलं परस्परासंकीर्णं यथा भवति तथा यथावत् अवयवेभ्यः एषां यथा न भवति तथा
नतीयांसं पांसुं तव चरणपङ्करुहद्वंद्वं विरिञ्चिः संचिन्वन् विरचयति लोकान् अविकलं ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसा हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिं । ३ ।
वहतीति । पयसि रक्षन् एनं पांसुकणं चतुर्दशलोकात्मकतया स्थितं शौरिः । शूरस्यापत्यं पुमान् शौरिः न न वक्षःस्थले धारयति शेषावतारत्वा
न् बलभद्रस्य । यद्वा श्रूयते हि नञ्शब्दितशौरिः सपरिवारः शेष इति यावत् । यद्वा शौरिर्विष्णुः यथा के जनुः शल्याः ३ भूमावात्मना विष्णुः स
प्तलोकान् धारयन् तिष्ठति । अशेषेण या लोकपरम्परा ऊर्ध्वतः स्थिता न इति शेषपक्षोऽपि च विष्णुः रक्षणविष्वधिकारात् । कथमपि कथंचित् स
हस्रेण शिरसा हरः अनेककालप्रपञ्चं हरति संहरः । संक्षुभ्य सम्यक् मर्दयित्वा एनं चतुर्दशभुवनात्मकतया स्थितं पादरजःकणं क्षुद्रं लसवन्तं उपरि
हने इत्यर्थः । भसितेनोद्धूलनविधिं । उद्धूलनं अङ्गुल्या उपलेपनं अङ्गरागकरणं तस्य विधिः अनुष्ठानं तथा क्तं । अत्रैवं पद्ययोजना । हे भगव

शिव० २

3

निवारितः नवपंकेरुहरजोवंतनीयांसं पांसुं संचिन्वन् लोकानविकलं विरचयति । शौरिः शिरसां सहस्रेण कथमपि वहति । हरः एनं संक्षुभ्य भसितो
द्धूलनविधिं कुरुते । अयं भावः । ब्रह्मादीनां सृष्ट्यादिकर्तृत्वं भगवत्याः पादरेणुमाहात्म्यमिति ।२। अविद्यानामिति । अविद्यानां अविद्यावि
शिष्टानामित्यर्थः । न विद्या अविद्या इति तु न सम्यक् । अविद्यायाः भावरूपत्वात् । अर्शआदित्वात् मत्वर्थीयः । अविद्यावंतः अविद्या इत्युच्यन्ते । यद्वा
अविद्याविशिष्टा अभूतपर्वारोपणाविद्या इति । तेषामंतस्तिमिरमिहिरद्वीपनगरी अंतस्तिमिरमज्ञानं तस्य तिमिरत्वमावरकत्वसाम्यात् । यथा बाह्यपदार्थानां
रूपाणि तमः तथांतरपदार्थानां रूपाणि अविद्यायास्तिमिरत्वं तस्य मिहिरद्वीपनगरी मिहिरः सूर्यः तस्य द्वीपः समुद्रमध्यवर्ती प्रदेशः । तत्र नगरी पट्ट
णं । जडानां मंदानां चैतन्यं चेतनता स्वार्थग्रहणं चेतनता मध्यगत पदार्थप्रकाशकारिणी चित्तविस्तारकवासनाशक्तिः । तद्रूपस्तबकः कल्पवृक्षगुच्छः

अविद्यानामंतस्तिमिरमिहिरद्वीपनगरी जडानां चैतन्यस्तबकमकरंदश्रुतिझरी ।
दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति ।३।

तस्य मकरंदः पुष्परसः तस्य स्रुतिः स्रवणं तस्याः झरी प्रवाहः । दरिद्राणां धनहीनानां चिंतामणिगुणनिका चिंतामणीनां गुणनं समूह इति यावत् । जन्मज
लधौ जन्मसंसारः स एव जलधिः समुद्रः संसारसमुद्रत्वारोपणमपारत्वसाम्यात् । तत्र निमग्नानां नितरां मग्नानां दंष्ट्रा मुररिपुवराहस्य मुरो नाम
दैत्यः तस्य रिपुर्विष्णुः स एव मुररिपुः वराहः । विशेषणावाच्यस्यापि विशेष्यमेव कथयति राघवशक्तिस्वाभाव्यात् । नवाग्रपंकजादिवत् तत्कल्पितं कारणं इव
वारकत्वात् । तस्य वराहावतारविशेषः तस्य दंष्ट्रा भवति । अत्रार्थं पद्ययोजना । भवत्याः पादरेणुः अविद्यानामंतस्तिमिरमिहिरद्वीपनगरी जडा
नां चैतन्यस्तबकमकरंदश्रुतिझरी दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ निमग्नानां मुररिपुवराहस्य दंष्ट्रा भवति । अत्र परिणामालंकारः ।

२ आरोप्यमाणस्य विआरोपविषयतया स्थितेः आरोप्यमाणस्य प्रकृतोपयोगित्वपरिणाम इति लक्षणात्। प्रकृतोपयोगित्वं नाम आरोपविषयत्वं। महाऽलङ्कारालङ्-
कारः। वर्ण्यविरूपणं पांसोहल्लेखनाम्नोरूपकं भवतु निमलिमप्राप्तार्थविवक्षितमिति। ३। त्वदन्य इति। त्वदन्यः भगवत्याः समस्तदन्यः इतरः पाणिभ्यामभयवरदः
अभयं भयाभावः सवरः इष्टार्थः ताभ्यां ददातीति अभयवरदः दैवतगणः दैवतेव दैवतं नैवितयाति लाक्षार्थे ऽप्रत्ययिभिः प्रसयाः प्रकृतिनो लि-
गवचनाद्यनिवर्त्तिते इतितेषां गणः इन्द्रादयः त्वं भगवतमुख्या एकत्वसंख्यासंख्यया वाने वासि न भवस्यैव। प्रकटितवराभीत्यभिनया। प्रक-
टितः प्रकाशितः हस्ताभ्यामिति शेषः। वरः इष्टार्थः अभीतिः भयाभावः तयोरभिनयः प्रकाशो यया सा तथोक्ता हस्ताभ्यामभयवरदानं सर्वदैवत-

त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ॥४॥

साधारणं असाधारणमभयवरप्रदानप्रकारमाह। भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं। वाञ्छाः कल्पनायाः समधिकं इ-
तार्थात् अधिकं इत्यर्थः। शरण्ये शरणार्हे लोकानां तव चरणौ सा हि शब्द इत्यर्थे इति संधिनेत्यर्थः। चरणौ पादौ एव एवकारः अवधारणे
निपुणौ समर्थौ। अयमर्थः पदयोजना हे भगवति लोकानां शरण्ये त्वदन्यो दैवतगणः पाणिभ्यामभयवरदः। एका त्वमेव पा-
णिभ्यां प्रकटितवराभीत्यभिनया नैवासि हि यतः तव चरणावेव भयात्त्रातुं वाञ्छासमधिकं फलमपि दातुं निपुणौ। अयं भावः
हस्ताभ्यामभयवरप्रदानं सर्वसाधारणमिति तव चरणावेव तादृशाभयप्रदाने प्रवृत्ताविति असाधारण्यं। अत्र व्यतिरेकोऽलङ्कारः। आय- शिवः

हरिर्विष्णुस्त्वां भगवतीं चक्ररूपिणीं विद्यारूपिणीं माराध्य पूजयित्वा ध्यात्वा च अनन्तरं त्रिपुरसुंदरीमन्त्रांशेषु एकमुखमन्त्रांशं सर्वविष्णुः
नेमस्थितामंत्रो हस्त्येन न सहेलि मन आह ॥ ह्रीं नादपीठानि हयं वयं व हशाक्षरी विद्या क्रमेण आम्नाता । कलार ई विभक्तिस्थेमयंन इत्या
नवाक्षई कारत्रयं हल्लेखात्मयस्य हरत्याद्दिनिवायं । षोडशकलात्मकस्य श्रीवाक्स्य गुरुसंप्रदायपरंपरागतस्य यस्थितिनत्वात्मना त्रिगुणो भी
कारणं तम ओविधामाः रहस्थितत्वां हिनिवायंतिहं । अनेके विष्णुमन्त्रजप समयावारानं तिष्ठासनतार ई विभक्ति क्षेम यंतो इत्याहिगु
लिवा हिताक्ष्यार इत्यादीकारेण साधईहल्लेखात्मयुक्ता ऊः । नमे कारस्य ईकारलोकरनुकल्पान सकलविद्यायाः षोडशावर्णात्मक
4
ञन हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥५॥
त्वं षोडशनित्या सकलनिमन्तत्वान मूलविद्यायाः एतद्वृत्तेः षण्मानं नैःशिवः शक्तिः काम इति ओकेहं यमात्वा नो वसे रक्षिपुणनर
मुपपादयिष्यामः । किं वासमंत्रस्य वेदमन्त्रत्वं ज्ञानानुवादकेन च प्रतिपाद्यते इति च वक्ष्यते प्रकृतमनुसरामः । प्रणतजनसौभाग्यज
ननीं । प्रकर्षेण नताः प्रणताः कायिकवाचिकनमस्कारवंतो भक्तजनाः तेषां सौभाग्यस्य जननी सवित्री पुरा पूर्वं नारी भूत्वा पुरी
पुं त्रिपुरान्तकं अपि शंभुं क्षोभ्यं हृदयं संक्षोभमनिक्षोभं मनोविकारं अनयत् नयति स्म । स्मरोऽपि सर्पिशत्रुः पूर्वोक्तं विष्णुधर्मं सुमु
निर्यथा विष्णुर्देवमंत्रस्य ऋषिः । एवं स्मरोऽपि त्वां धर्मी नत्वा धारण्यमुपगम्य श्रीचक्रं सपर्यममस्य तन्त्रमलक्षिणां समभ्यसन्

मगवाञ्छिन्नसत्वः त्रिनयनलेशेन रतेः सपत्न्याः नयनाभ्यां लेशेन रतिनयनैकदेशेन समर्थः । यद्वा रतिर्नाम अतिसुन्दरीम
नसीतस्याः नयनलेशेन अभिसौंदर्येण वपुषा हेमसुनीनां इन्द्रियाणामपि । अपि शब्दः संभावनायां । अन्तः अन्तरंगो विम
नो ऽपभवति समर्थः । भवति हि प्रसिद्धमाहात्म्यं राज्ञां विषयवासनाहीनानामपि महात्मनां । अत्र पद्यरचना हे भगवति
प्रणतेभ्यो ऽनन्यजनीनां हरिहराधिपुरनारीभ्यस्तुमपि क्षोभमनयन्सदा पितांबरो नयनलेशेन वपुषा महतां
मुनीनामन्तः साहाय्यं भवति । पुरा किल नारायणाय पत्नीरूपधारीकेन कृत्वा भिन्नेन भगवता नाम दांहरूपं शंभुनाप्यर्थितः सन्

धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपामपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥ ६ ॥

नमस्कारपितानंत्वा माहयामास तत्कथं तु संभवेत् । स्मरोऽपि सकलमुनिमनःसंक्षोभं कुर्वाणः प्रवर्तते । तत्र वामकेश्वरमहातं
त्रनिरूपितं । एतामेव पुरा भगवान् विष्णुः मोहिनीं । भगवान् संमोहयामास कामारिं भगवान् हरिः । कामदेवो ऽपि देवीं महात्रिपुरसुं
दरीं । समाराध्य सर्वलोकसर्वसौभाग्यसुंदर इति । अनेन वचनेन रतिनयनं मनः क्षोभकरत्वं भगवति प्रसादलभ्यमिति सूचितं स्म
मारस्य । ५ । यद्यस्मिन्पूर्वश्लोके भगवति प्रसादग्रसाधितमन्मथस्य सामर्थ्यमुक्तं तथापि मन्मथस्य अनंगविधायाः मन्मथप्रतारे
पितांतरायगमनमन्मथप्रामाण्यमाह । धनुरिति । अत्र पद्ययन्त्र संध्याहारः सकलं कविसमयसिद्धः पुष्पैर्बाणगर्भाणिसर्वस्यापि शि

सत्रे यो प्रक्रान्तो वः इति तथा येन नामके विघ्नितः पृथग्यस्य वत्साभिसाहैययुगमस्थेनं प्रसेषयं न इति । धनुः आयोधनसाधनं चापः । पौष्प
पुष्पमयं पुष्पाणामलि मकुलान स्पर्शसहत्वा गकर्णाकर्षणापकर्षो न र्हत्वमिति नामर्थः । पञ्च संख्या संख्येयाः विशिखाः बाणाः पञ्चबाणावि
क्षेपणं न सौ आवपनं शरणं मिति नामर्थः । किं च पञ्च विशिखा इत्यनेन नादशिखानां प्रत्यग्रनाम्नकमलकल्पसिद्धये शिखकार्यारका
त्वाङ्गानं इति नामर्थः । मारी ङ्की मधुकरमयी मधुरैकथ्यमरैः प्रयुतम मरं पंश्मानितिमेभसर्थः । परस्मतासं वंधानीनं वा विङ्की
5 त्वं न संगच्छत इति नामर्थः । वसन्तः समयविशेषः । वसन्तो मधुमाधवाविस्मरः । सामर्तः सवितः न स्वकालात्मकत्वान सविवका
रित्वं न संगच्छत इति नामर्थः । मलयमरुद्दक्षिणानिलः । आयाधनं धनुः आयोधनं युद्धस्य साधनं । संद्रनः मलयमरुतो म
स्पष्टितलतानसावंत्रिकत्वं सार्वत्रिकत्वेन सर्वत्र सङ्गतः सर्वधमसङ्गवोपिनो रूपतारूपमयं कारित्वं न सम्बन्धीति नामर्थः । न
यासनि उक्तप्रकारे सर्वं तात्सिद्धिपिकः असहायशूरः सर्वसकलं सपदं हिमगिरिसुते हिमप्रधाना गिरिः हिमगिरिः शाकपार्थि
वत्वात्साधुत्व स्वसुता नेत्रतानस्याः संबुद्धिः हे हिमगिरिसुते कामपि अनिर्वाच्यामपि शब्दः संभावनायां क्षेप्यां अनुकम्पाभियागानं कम्प्यानेननव
रुध्वा यायकनतं गमात्मकं स्वरत्रात्म्यकस्मा प्रातमः । रूपरिहृयमानमनंगः अंगरहितः । अत्र साधकस्य देवत्वं सवितं हत्वा प्रगवाचापाक
कर्षणशरसंधाने असंगावितपाद्यवैगराहस्था वहितनिरसंगापि नवक्रनयनाधनुषा हृयस्येन मधुना साधं संग्रामगणसहायसन्नाह्याः असंगा
इति नामर्थः । विजयने विपराभ्यां ... मनपद । अत्रथं पद्यारुनाहे हिमगिरिसुते यस्यानंगस्य धनुः पौष्पं मौर्वी मधुकरमयी विशिखाः

वसामंतो वसंतः आयोधनरथः मलयमरुत्तथापि तेनांगः एकः तेनापांगालोकमपि लब्ध्वा सर्वमिदं जगादिह यते । अन्यैर्विमनन
५ ङ्कारः । विनयसाधनान्तरे विजयमहार्थकैः । अकारणेनापि नाकायसोऽभिर्विजयते निष्प्रमाणेन । ६ । सुधांशुरिति धामेध्य इत्यमरम
श्लोकोपयोगिन्यासमवेपिता चतुर्विधध्यानानुसंधानमाह स्मा मणिपूरे ... गवसाः यादृशं रूपं तादृशं लोनि । क्वण । कांचीदाम
शिंजन्मणिमेखला । करिकलभकुंभस्तननता । करिकलभस्तुल्याभ्यां स्तनाभ्यां नता ईषन्नम्रमध्ये सर्पः । परिणतशरच्चंद्रव
दना । परिणतः संपूर्णः शरदि शरत्काले चंद्रः इंदुः तद्वद्वदनं यस्याः सा धनुर्बाणान् इक्षुधनुः पुष्पबाणान् पाशं प्रेम सृणिमंकुशः

क्वणत्कांचीदामा करिकलभकुंभस्तननता परिक्षीणा मध्ये परिणतशरच्चंद्रवदना ।
धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादास्तां नः पुरमथितुराहो पुरुषिका ॥ ७ ॥

अपि शब्दः अंकुशं समुच्चिनोति । दधाना बिभ्रती करतलैश्चतुर्भिर्हस्ततलैः पुरस्तान्नेत्रयोरग्रे मणिपूरलिंगे स्थानेऽपि । आस्तां उपविशतु नः ७
अस्माकं पुरमथितुः त्रिपुरांतकस्य । यद्वा त्रिपुराणि शरीराणि जितानि भस्मानि मथितवान तेन नीलकंठ इति प्रसिद्ध हरइत्यमरः स हरः त्रि
पुरमथितेत्युच्यते इति । आहो पुरुषिका । आहो शब्द आश्चर्ये पुरुषस्य भावः पुरुषिका अहंता पुरुषत्वेनाभिमानः । अत्र पद्यार्थो
क्वणत्कांचीदामा करिकलभकुंभस्तननता मध्ये परिक्षीणा परिणतशरच्चंद्रवदना धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरम
थितुराहो पुरुषिका नः पुरस्तादास्तां । अत्र यद्यपि ... मनसा ध्यानं ... यावत्साना ... सवितुः ... पादयित्वा ...

टी. ५

सुधासिंधोर्मध्ये। अमृतसमुद्रस्य मध्ये। सुरविटपिवाटीपरिवृते। सुरविटपिनां कल्पवृक्षाणां वाटीभिः श्रेणीभिः परिवृते मणिद्वीपे मणि
मये नीपोपवनवति नीपैः कदंबैः उपवनवति चिंतामणिगृहे चिंतामणिरचिते शिवाकारे शिवशक्तिरूपात्मिकोणनिवावने। मंचे तल्प
यां परमशिवपर्यंकनिलयां। परमशिव एव पर्यंकः तत्र निलयः स्थितिर्यस्याः तां भजंति सेवंते त्वां धन्याः त्वत्प्रसादवशात् कृतार्थाः।
कतिचन विरलाः। चिदानंदलहरीं। चित् ज्ञानं आनंदो निरतिशयसुखं तत्स्वरूपलहरीं उत्सेकरूपां। अत्र श्लोके पदयोजना। हे भगवति सुधासिं
6 धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिंतामणिगृहे शिवाकारे मंचे परमशिवपर्यंकनिलयां चिदानंदलहरीं त्वां

सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिंतामणिगृहे।
शिवाकारे मंचे परमशिवपर्यंकनिलयां भजंति त्वां धन्याः कतिचन चिदानंदलहरीं। ८।

कतिचन धन्याः भजंति। अत्रेदमनुसंधेयं। भगवत्पादाचार्याः समयमतपारदृश्वानः समयाचारप्रवीणाः समयरूपां भगवतीं स्तुवंति।
समयाचारो नाम आंतरपूजारतिः। कुलाचारो नाम बाह्यपूजारतिः इति रहस्यं। एतच्च तत्र तत्र आधारचक्रे सह समयस्याधिष्ठानं कृत्वा व्याख्यानावसरे
पुनरुपपादयिष्यामः। श्रीचक्रस्य वियच्चक्रमिति नामांतरमस्ति वियच्चक्रं तु वियत्स्थं। तद्द्विविधं। हृदयाकाशं बाह्याकाशं च। बा
ह्याकाशं नाम बाह्याकाशपीठे श्रीचक्रे पूजा उदकस्य हेमरजतादिपट्टे लिखित्वा समाधानं। एतेनैव कुलपूज्यत्वादूर्ध्वस्थाः। तदुक्तं तत्रस्व
न। हृदयाकाशं नाम हृदयाकाशांतर्गत [illegible] स्वात्मने। ननु भवनवयानिषु अ

६

पः स्थितः शिवात्मकयोनिचक्रस्योपरि उपरि स्थितं शक्त्यात्मकयोनिपंचकस्य मध्ये शस्यैवं बिंदुस्थानस्य नाम सुधासिंधुरिति। बिंदुस्थानं सुधासिंधु
पंचयोन्यः सुरद्रुमाः। तन्नीपश्रेणी वनं तन्मध्ये मणिमंडपः। चिन्तामणिनामणिकृतं इत्यामंदिरमुत्तमं। शिवात्मके महामंचे महेशानोपवर्हणे।
अतिरम्यतल्पे तत्र कशिपुश्च सदाशिवः। अतः कान्तवपुषा महेश्वरपर्यंकमहः। तन्मात्रपरमेशानी महात्रिपुरसुंदरी। शिवार्कमंडलमिति
इदं पंचीकृतमंडलं। तन्मध्ये नाम नक्रं इति परमानंदनोदिताकुलयोषित्कुलं संख्यापरं वर्णनमतिसा। इति चरणयामलेनामकेश्वरतंत्रे चतु
रूपाष्टकविधायां कथितं इत्यामंदिरमुत्तममित्यस्यार्थः। इत्यामंदिरं त्रयस्त्रिंशत्कोणाष्टके श्रीचक्रमुच्यते। तथाके शिवापरं चतुरस्र
त्रिकोणात्मकं श्रीचक्रस्यैवं बिंदुस्थानं प्रत्यंगता इत्य प्रधानत्वात् प्रधाने गुणस्थाने श्रीचक्रे इति रहस्यं। अत एवास्यार्थः। अतः कोऽप्यसौ
द्रुहिणहरिरुद्रेश्वराः। एतत् चगतोत्तममचलं द्रुहिणहरिरुद्रेश्वरास्त्वा इति कथ्यार्थ्याना वसरे वक्ष्यते। शिवार्कमंडलमिति वस्त्वर्थः। शि
वानाम शक्तिः कुंडलिनी अर्कमंडलं हृत्कमलोपरि स्थितं त्रिदलं दिनं कलाआच्छाद्यत्यर्थः। अर्कमंडलोपरि स्थितं ब्रह्मद्वारपिधायं सह
स्रकमलांतःस्थितं चंद्रमंडलं द्रावयति। अतएव कुंडलिनी शक्तिः कुलकुंडमार्गेण सकलतत्त्वचतुर्मंडलं आच्छाद्य परं चरण
द्विसमानसहस्रनाडशुभवर्णोत्सवे निशेषः। सा कुंडलिनी पुनः स्वस्थानमत्र साधिष्ठानं प्राप्य स्वपिति तिलिनालमर्थे। शिवादीनां संवत्सरप
धानत्वपतद्दृष्ट्वा वस्तुप्रचलं कामरूपत्वादेवान्नाम सुनासन्नेसर्वार्थघटने इति मत्वार्थसंक्षेपेणोक्तवान्सदाशिवः। सुधाब्धौ नंदन
धाने रत्नमंडपमध्यगां। बालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनां। पाशांकुशधरां चापधारयंतीं शिवांशिवां। ध्यात्वा चेद् हृत्वचक्रे ब्रह्मरन्ध्र

शिव० ६

7

परमेश्वरीं पूर्वोक्तध्यानयोगेन संविद्रूपमाराधयन्तीति । क्वणत्कांचीदामेति सुधासिंधोर्मध्य इति वक्ष्यमाणक्रमेण मणिद्वीपे स्वर्णाख्यानमि
त्यवगंतव्यं ।९। महीं पृथिवीतत्त्वं मूलं गुह्यस्थानं सर्वाधारभूतं चक्रं मूलाधारं इति नाम्ना मूलाधारे । कं उदकं तत्त्वं अपिशब्दः स्वाधिष्ठा
नाख्यं चक्रं समुच्चिनोति । मणिपूरे मणिपूरकचक्रे पञ्चस्थितानां रत्नानां मणिभिः पूरयति स मणिपूरः । समुच्चिनाम्नायेन पूजनं वस्तने नी
यकमलं नानारत्नविभूषणार्पणैर्व्याप्तं तन्नामकं चक्रं । हुतवहं अग्नितत्त्वं स्थितं प्रतिष्ठितं । स्वाधिष्ठाने स्वाधिष्ठाननामके चक्रे अंगतत्त्वाः लिंगाः
स्वयाधिष्ठितं स्वं लिंगं यत्र तत् स्वाधिष्ठानं । पञ्चात्मके योगशास्त्रप्रसिद्धयाः षडूर्मिवीर्यशक्तिः स्वाधिष्ठाना नाम शक्तिनी । यद्वा आधारचक्रस्योपरि स्वाधि

महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसे ।९।

ष्ठाने वर्णनीयं तथा व्याकाशादिना सोपानक्रमेण मणिपूरवर्णनेऽपि ननु संधेयं पोऽनेन गन्ताशा चक्रस्थामस्मादिश्यात्क्रमात्त्यानावसरे स
म्यगुपवर्णनीयमिति । हृदि हृदयाकाशे अनाहतनामचक्रे । अनाहतं नाम नादस्थानं तद्गतं नामास्य । मरुतं मरुत्तत्त्वं आकाशं आकाशतत्त्वं उ
परि पूर्वोक्तानामुपरिविशुद्धचक्रे । शुद्धस्फटिकसंकाशत्वाद्विशुद्धं नामास्य । मनः मनस्तत्त्वं । अपिशब्दः उक्तसमुच्चयार्थः । भ्रूमध्ये भ्रुवोरन्तराकाशे
आज्ञाचक्रे । आज्ञां षट्चक्रेषु न स्थानं अयन्त साधकानां भगवन्निर्विष्टं आज्ञां तत्संबन्धिनी अनेऽनिर्यमनतायाः भगवत्याः आज्ञाचक्रं भवति । तस्मा
न्नादेन रूपेण स्वाद्वस्तूपाणां वस्तुसाक्षात्कारो नामास्य । स्थितं निमित्तसर्वं ज्ञानुषज्यते । सकलं एतत् सर्वं भित्त्वा भिन्नं कृत्वा कुलपथं सुषुम्नामार्गं नि

सौ॰टी॰

णसहस्रारेपद्मेसहमीलित्वारहसिएकान्तेपत्यासदाशिवेनविहरसे।अयमर्थःपदयोजना।हेभगवतिमूलाधारेमहींकमपिमणिपूरेहुतवहंस्वाधि
ष्ठानेहृदिमरुतंआकाशमुपरिमनोपिभ्रूमध्येआकाशमपिस्थितंभिनिभिन्दक्षिप्रमलमयनसर्वगानुषड्यन।सकलंकुलपथमपिभित्त्वासहस्रा
रपद्मेसहरहसिपत्याविहरसे।अयमर्थोनुसंधेयः।मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाचक्राख्यानिषट्चक्राणिएतानिपृथिव्य
ग्निरूपवनाकाशमनस्तत्त्वात्मकानितानितत्त्वात्मकैश्चक्रैःपुनर्मायामयपाशस्थितानितानिमायामलुगंधरूपरसस्पर्शशब्दात्मकाः।आज्ञाचक्र
स्थितेनमनस्तत्त्वेनएकादशेन्द्रियगणःसंगृहीतः।एवमेकविंशतितत्त्वानिप्रतिपादितानि।पत्यासहरहसिसहस्रारपद्मेविहरसेत्यनेनत
त्त्वचतुष्टयंसूचितं।तत्रमायाशुद्धविद्यामहेश्वरसदाशिवात्मकंतत्त्वचतुष्टयं।एवंमिलितानिपंचविंशतितत्त्वानितानिमायापर्यन्तानिमायाः
पुरुषत्वात्मकानिमहेश्वरेणसंयुक्तानितत्त्वप्रकाशवम्मापादकानिसद्भिःचैतन्यएवशुद्धविद्यानुसदाशिवेनसंयुक्तासतीसदाख्याना
मकलाशक्तिर्वाच्यते।अतोभगवतीचतुर्विंशतितत्त्वानिरूपाणिविंशतिमस्पृशीत्यर्थःमलिनाम्पङ्क्तिभगवतीमेलनसहनवतीनरतात्त्व
सदाशिवेनपंचविंशेनसार्धंविहरमाणाषड्विंशतितत्त्वमापन्नापरमात्मनिगीयते।ननुकथंभगवति।सदाख्यकलापंचविंशतिसदाशिवेनमीलि
ताषड्विंशतिभगवति।मेलनस्यतत्त्वान्तरत्वात्।नचाऽयमेलनंमुख्यमस्ति।तस्यतादात्म्यरूपत्वात्तत्त्वान्तरमितिरहस्यं।यत्तुश्रुतिवाक्यम्पंचविं
शआत्मासप्तविंशतितत्त्वसदाशिवमलगतिपादनपरंमेलनपरंमितिप्रायं।ननुकथंसंस्थानश्रीचक्रस्यमध्यस्थितंशिवचक्राणांच
तुर्णामुपरिशक्तिचक्राणांपंचानामधस्तादवस्थितंतत्सहस्रारपद्मस्यतुसर्वेषामुपरिवर्तमानत्वात्स्वदेहसंस्थानमहत्त्वमुपपद्यतइतिचेत्।
निःशय्यताम्।गगनमनरहस्यं।चतुर्भिः [illegible] शिवयावैपुरिस्मागशक्तिचक्राणिनिम्ना

शिव॰ ७

णाष्टदशारद्वितयचतुर्दशकोणात्मकानि पंचचक्राणि। शिवचक्राणि अष्टदलषोडशदलवृत्तत्रयभूपुरत्रितयात्मकानि। अतः शक्तिचक्रा
णां वामतः शिवचक्राणि शिवस्य शक्तेर्वामभागगामित्वात् नि चक्राणि बिंदुरूपेणाष्टमशक्तिचक्रान्तरस्थापितानि अत एव बिंदुः शिवचक्रे चतुष्टयात्मकः। शक्ति
चक्रेषु पंचसु पंचगुणः समास इति शिवशक्त्योरैक्यमिति हृदयं। अन्ये तु बिंदुत्रिकोणयोरैक्यं अष्टकोणाष्टदलयोः दशारयुग्मषोडशदलयो
श्चतुर्दशारभूपुरत्रितययोरैक्यम् अनेन प्रकारेण शिवशक्त्योरैक्यमित्याहुः। अत्र बिंदुशब्देन शिवचक्रचतुष्टयात्मनि निधिभूतो वर्तुलाकारो लक्ष्यते।
न चतुष्कोणमध्यवर्ती बिंदुः स तु न तु सहस्रकमलान्तर्गतः आधारस्वाधिष्ठानद्वारकृतपदनिष्प्रभतः शिवशक्तिमेलनाविष्टतनुः सप्तत्रिंशत्त
त्त्वेन सह बिंदुनादकलानामैक्यं नास्ति नु स्वनादबिंदुरूपत्वाभावात्। एतत्त्रिपुरत्वामिवेद्यपि यथा। अत एव सहस्रकमलान्तर्गतचंद्रमंडलमध्यवर्ती
सुधासिंधुरखंडगवल्याः विहरणस्थानमिति सहस्रारपद्मे विहरति। सुधासिंधोर्मध्ये इति रहस्यनामार्थ इति रहस्य। अमुमर्थं रुद्रयाम
ले वेदृशानविद्यायां शिव आह पार्वतीं प्रति। चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पंचभिः। नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः। त्रिकोणमष्टको
दशकोणद्वयं तथा। चतुर्दशारं चैतानि शक्तिचक्राणि पंच च। बिंदुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकं। चतुरस्रं चतुर्द्वारं शिवचक्राण्यनुक्रमात्। त्रि
कोणे बैंदवं श्लिष्टमष्टारेऽष्टदलांबुजं। दशारयोः षोडशारं भूगृहं भुवनाश्रके। शैवानामपि शाक्तानां चक्राणां च परस्परं। अविनाभावसंबंधं यो जा
नाति स चक्रवित्। त्रिकोणमष्टकोणं च दशकोणद्वयं तथा। मनुकोणं चतुष्कोणं कोणचक्राणि षट्क्रमात्। मूलाधारं तथा स्वाधिष्ठानं च मणिपू
रकं। अनाहतं विशुद्धाख्यमाज्ञाचक्रं विदुर्बुधाः। तदाधारस्वरूपाणि कोणचक्राणि पार्वति। त्रिकोणरूपिणी शक्तिः बिंदुरूपः परः शिवः। अविनाभा
वसंबंधं तस्माद्बिंदुत्रिकोणयोः। इतः परं मिथश्चतुर्वचतुष्कोणानि शिवचक्रात्मकं चतुस्तुरसारणीधामसु तानि चत्वारि त्रिकोणानि शिवात्मकानि

क्रः। शिवचक्राणि वात्यानि नह्रूपणा वस्थितानी स्मवं परंनि। मृदा। कौलमतानुसारेण धामुरा निचला रित्रिकोणानि शिवात्मका निर्ऊर्ध्वमुखानि पंचत्रिकोणानि
शक्त्यात्मकानि। कौलमते संहारक्रमेण त्वन त्रिकोणात्मकं श्रीचक्रं एतत्सर्वं चतुर्भिः श्रीकंठैरित्यादिश्लोकव्याख्यानावसरे एव क्रमपि सहस्रारेपि सहरह
सि पत्या विहरसीत्यत्रावश्यवक्तव्यत्वादुक्त्या पूर्वा गिनयाऽत्र च क्रं विकथितं। विस्तरस्तु तत्रैवावधार्यः। १। सुधेनि। सुधायाः अमृतस्य धाराणां आसारैः
संपातैः अवतोआसारशब्दस्त्वधारासंपातवचनः इति धाराशब्दसाहचर्यादासारशब्दः संपातवचन इति नपौनरुक्त्यं। यद्वा सुधायाः आधारभूता आसाराः धारासंपा
ताः तैः चरणयुगलांतर्विगलितैः चरणयुगलस्य पादद्वितयस्य अंतर्विगलितैः मध्यप्रदेशात्स्रविद्भिः प्रपंचं सिंचति सहस्रनाडीमार्गे सिंचंती पुनरपि।

सुधाधारासारैश्चरणयुगलांतर्विगलितैः प्रपंचं सिंचंती पुनरपि रसाम्नायमहसः।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि। १०।

सचनानंतरमपि। रसाम्नायमहसः। चंद्रात्मकाशात् साम्नायमहः शब्दोपामलंकुकलानिधेः प्रसिद्धः। रतास्य सुधायाः आम्नायागुणाधिक्यं
न्नात्मकं महः कांतिर्यस्य सः रसाम्नायमहा इति व्युत्पत्तिः। अवाप्य स्वां भूमिं स्वकीयां भूमिं आधारचक्रं भुजगनिभं सर्पसदृशं अध्युष्टवल
यं अधिष्ठितकुंडलिनीविशेषं। स्वं निजं। आत्मानं कृत्वा सत्वहृत्पमवलंब्य स्थापित्वा स्वपिषि निद्रासि कुलकुंडे कुः पृथिवीतत्त्वं लीयते यस्मिं
न्नत कुलं तन्मूलत्वं कुंडं च आधारचक्रं लक्षणया सुषुम्नामार्गः कुलमिति यावत्। अतएव कौलाः कुलपूजकाः आधारस्य चक्रात्तन्त्रि पांकोक्ते
त्यभिमतिरहस्यं। एतदुत्तरत्र स्फोरमिते। कुलमार्गस्य सुषुम्नायाः मूलरूपकुंडं कमलकंदाधारकुंडाकारं आधारकंदं तस्मिन् कुहरिणि कु
मलकंदमध्यस्थितच्छिद्रयुक्ते छिद्रं यस्य कुंडं तस्य तत्तथा तस्मिन्। आधारकंदस्थितं सुषिरं मध्ये विसतंतुनिभा चकुंडलिनी शक्तिर्वेष्टव

नीलितान्यर्थे। अत्रेत्थं पदयोजना। हे भगवति त्वच्चरणांतर्विगलितैः सुधाधारासारैः प्रपंचं सिंचंती रसाम्नायमहसः सकाशात्स्वां भूमिं
पुनरध्यास्य भुजगनिभम् अध्युष्टवलयं स्वम् आत्मानं कृत्वा कुहरिणि कुलकुंडे त्वं स्वपिषि। अत्रायमनुसंधेयः। शिरःस्थितचंद्रमंडलं योगशास्त्रे
प्रसिद्धं। तत्तु समयिनां मते श्रीचक्रमेव चंद्रमंडलं षोडशकलात्मकत्वाच्छायायाः प्रतिपदादिषोडशतिथिरूपकेणारक्षितक्षयपयाः वक्ष्यमाणत्वा
त्। चंद्रमंडलमेव नंदनवासस्थितचंद्रमंडलं श्रीचक्रमेवेति तु शुभगोदयव्याख्याने दर्शितं तत्तु महारहस्यं। अतः शिरःस्थितसहस्र
कमलांतर्गतश्रीचक्रात्मकचंद्रबिंबमध्यस्थितायाः भगवत्याः चरणनिर्गलितैः सुधामयैः साधारस्य सकलशरीरं संप्ला
व्य पुनर्भुजगरूपेणाधारकुंडे प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति यथाक्रमं समर्थनं च। भुजगाकाररूपेण मूलाधारं स
9 मास्थिता। शक्तिः कुंडलिनी समविसतंतुनिभा शुभा। विमृश्य स्वयं सर्थः। मूलकंदं तु छादनेन च्छादयित्वा कमलकंदवत्तां सुखेन पुच्छं स्वमुखे संप्र
रंध्रं समन्विता। पद्मासनगतस्थापि गुदमाकुंच्य साधकः। वायुमूर्ध्वगतिं कुर्वन् कुंभकाविष्टमानसः। वाय्वाघातवशादग्निः स्वाधिष्ठानगतोज्व
लन्। ज्वलनाघातपवनाघातेरुन्निद्रितो हिराट्। रुद्रग्रंथिं ततो भित्त्वा विष्णुग्रंथिं भिनत्त्यतः। ब्रह्मग्रंथिं च भित्त्वैव कमलानि भिनत्ति
षट्। सहस्रकमले शक्तिः शिवेन सह मोदते। सा चावस्था परा ज्ञेया सैव निर्वृतिकारणं। पुनरपि भगवत्याश्चरणयुगलस्य सुधाधारा
सारैः प्रपंचसिंचनं प्रतिपादयति। तथापि डाकस्य द्वारमर्ध्विमस्य विवरं च्योतितं भुज्यमानं महस्तत्र भ्रमतस्य धारावरूपा होरमानं च
रणं नाडीकसुषितां द्भातु। अस्यार्थः। [illegible] मिस्यर्थः। अविमतः अवि

विमयूखाः अस्य संनीति अर्थिमन अर्चिषमतिः इत्यर्थः। ॐ ह्सः स्फारःऽणवः पवित्रं स्वयमपि शुद्धं अन्यथा शुद्धिहेतुश्च व्याप्तिमन्तः माऊनं मामस्तु
हि सामेघुपंण्डनं वस्तु इत्यर्थः। यद्वा किंतं उमानंदमांचके क्षिणो षट्पंचाननसामस्तर्यानऽज्ञम्के भिनि वृष्भनं। अर्चिषा दिसनं नेआतंपान्यभी
भिअपानरशनं कृष्णेन। व्याप्तिषाद्रिसनेन एणवानि षट्त्रिंशद्गुनरशनं। भाविनि। महसा दि सनेन ज्ञानवीर्याः षोडशानरशनं महाभि
किरणाः संगस्तेन। एतत् क्षिणो षट्पंचाशदित्यादि श्लोके व्याख्यानावसरे निपुणतरमुपपादयिष्यामः। अमृतस्य धाराः उत्पादकं
कारणं हि समनिसहस्रमार्गशुमहमाने किरणात्वं इमंहृदगतं सुधाधाराधनवाहाभिर्जयम भेदविनाच्च षण्द्धि इत्यर्थः। तत्कुरणं। पदंभि
रेवरणाः लियाभिरसद्धिधानात। नः अस्मान् लोके प्रपंचं सुधानं मानं। यद्वा संज्ञानंतुद्दिप्रकाशनं तु षिपः कृत्वाः धातुपुष्टात्। नन्
षंमंत्रः अमास्वपुपापत्वेनास्मानः मंत्राणां समानार्थप्रकाशनशीलत्वाद्वरणा मत्ताधिपाहत्वशरणे व नाम्ना पानुनयात्व्याख्यानेन
संगच्छते इति चेन्न। अत्रा ऊर्ध्वगवमार्गः। सिक्षमन्त्रेपरित्यज्येति क्षामहत्त्विद्धसिनिरितितो। अपमाशयः। वेदस्वकेन हृन्ते वाक्सिद्धफलं प्राप्तं
र्थत्वेन सर्वसिद्धिदृष्टिमनंतद्व्यवहारातदपि शक्तिके ओंकस्यक्षरं मित्यादिके विशेषणविशिष्टत्वात् ईश्वरगतव्यापारवरणमेव। वरणापत्वात्
स्य वरणशब्देनाभिधीयत इति। १०।

शिव०

पूर्वश्लोके इदमंडलात्मकं श्रीचक्रं मुकुंदाय देव श्रीचक्रमुपदिशति। चतुर्भिरिति। चतुःसंख्याभिरत्यर्थैः श्रीकंठैः शूलानिद्राक्षनालीनिश्राः
निषंकेचयस्यासौ श्रीकंठः हृदः श्रीकंठनाथस्यानंतप्रवेशः अनन्तचक्रवन्चनसिद्धिः। श्रीकंठात्मके इत्यर्थः। अपिशब्दः। भिन्नाभिः प्र
कर्षणाभिन्नाभिः। प्रकर्षस्तु शिवशक्तिचक्रमध्यवेदव्यत्तानस्य विद्यमानत्वात् एवं ब्रह्मसमयमनेन सृष्टिक्रमेण पंचचक्रेरलतनुसंघो केवलमन
नसंहारक्रमेण नवयोनिचक्रे रत्नउर्ध्वाधोमुखत्वं पारभृत्योनः भिन्नत्वेऽपि यत् तेनांदयंश्च पथएष्वस्थ कस्थितमित्यर्थः। शंकराः इति पं
नमीतांमुशाद्वचत्वारः श्रीकंठाधुच्येन। नवभिः नवसंख्यैः। अपि शब्दो वक्ष्यमाणवाक्यसमुच्चयार्थो नाति। मूलप्रकृतिभिः। प्रपंचमूलका

10

चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः।
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयत्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः।११।

रणेः अनंतरतेषां योनिशब्दव्यवहारः। नवयोनियानवधातात्मकाः। तथा चोक्तं कामिकायां। त्वगसृङ्मांसमेदोऽस्थिधातवः शक्तिमूल
काः। नवधातुरयं देहो नवधातुसमुद्भवः। शीवधातुनामज्जीवाधिष्ठितत्वात् आज्ञाधातुरजीवधातुरुच्यते। यथा कैवल्यमाहृदे। रमाद्यिस्तुमूल
नानां धातूनां प्रसादजत्वात् श्रीवाधारम्भेन धातवः हृदयोजइति शमीधातुरकं परा शक्तिः सहस्ररीढशमी धानिः वेदवत्सानं रमत्रे स्वयीन स्वेदरस
त्यर्थः। एवं पिंडं मुमन्नमंमनग्रे सांमिलुंड। पंचभूतानि शक्ति माया प्रकृति शिवस्तु माया शुद्धविद्या महेश्वर सदाशिवो। पंचविंशतितत
त्वानि नवैवान्तर्भवन्ति। एतासां षट्त्रिंशत्तत्त्वानि प्रामस्थन। शिवशक्त्यात्मकं विदितुं गात्रन्वरावरं। वरं पिंडं अवरं ब्र

सोऽहमित्यर्थः। केचित्तु एकपंचाशत्तत्त्वान्याहुः। तथाहि। भूतानि पंच तन्मात्राः पंच पंचेंद्रियाणि च। ज्ञानेंद्रियाणि पंचैव तथा कर्मेंद्रियाणि च। त्वगादि धातवः स
१० प्त पंच प्राणादि वायवः। मनश्चाहंकृतिस्त्रिगुणाः प्रकृतिपूरुषौ। रागविद्याकले चैव नियतिः काल एव च। माया च शुद्धविद्या च महेश्वरसदाशिवौ।
शक्तिश्च शिवतत्त्वं च तत्त्वानि क्रमशो विदुः। एतानि पंचाशत्तत्त्वानि वायुसंहितादि शैवपुराणेषु प्रतिपादितानि। अस्यार्थः। पंचभूतानि पृथिव्यप्
तेजोवाय्वाकाशात्मकानि कार्यकारणरूपेणावस्थितानि। गंधादितन्मात्राः पंचकं पृथिव्यादीनां कारणभूतं। ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णात्मकानि। कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थात्मकानि। धातवः त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लात्मकानि। वायवः प्राणापानव्यानोदान
समानाः। मनः मननात्मिका शक्तिः। अहंकारः अहंकारकृन्निष्ठशक्तिः। माया इदं कालिकाप्रज्ञानं। शुद्धविद्याभावकज्ञानं। महेश्वरः सर्वाणुग्रावि
शिष्टः सृष्टिकर्ता। सदाशिवः स्थितिकर्ता। शक्तिः महेश्वरसदाशिवयोः सर्जनरक्षणशक्तिः। चकारात्संहरणशक्तिश्च कालात्मिका। शिवत्वं तु
द्रस्वरूपं। एतेषु तत्त्वेषु कतिपयतत्त्वानि कुत्रचिदंतर्भवंति। त्वगादिधातवः अन्नप्राणादयः वायवोऽहंकारसमनसि त्र्यानः त्रिधा च गुणा
नां प्रकृतौ प्रकृतेस्तु शक्तौ पुरुषस्य महेश्वरस्य कलादयः शुद्धविद्यायां नियतेस्तु शक्तौ कालस्य महेश्वरे जीवतत्त्वस्य सदाशिवतत्त्वे अंतर्भाव इति। त
त्त्वानि पंचविंशतिरेतानि पंचभूतानि तन्मात्रपंचकं ज्ञानेंद्रियाणि कर्मेंद्रियाणि मनो माया शुद्धविद्या महेश्वरसदाशिवात्मकानि पंचविंशतितत्त्वानि
सर्वसंमतानीत्युक्तमनुगृहीतत्वात्। श्रुतिश्च पंचविंश आत्मा भवतीति। अतश्च षट्त्रिंशत्तत्त्वानि इत्यादि विकल्पः। उक्तमनुसारेण पंचविंशतित शिवः
त्त्वपरत्वमनुसंधेयं। अतश्च सर्वतत्त्वातीतं शिवशक्तिसंपुटं तस्मादेव जगदुत्पत्तिः। तदुक्तं सुभगोदये। पराशक्तिरहितः शक्तः कर्तुं न किं १०

वन।शक्त्यात्मकमेशानि।व्याप्तुकोऽध्येवपरि।अनयवृत्तत्रयमभिहितनन्तुगोऽपवल्यायानावसरनिगुणनमृपुपार्श्वनमस्याग्निरिस
न्त्रमभिविस्तरेण।मङ्गलमनुसरामः।चतुश्चत्वारिंशन्दनन्तसंख्याकाः।चतुर्दलकमलाष्टदलपद्मेर्वाग्निःपसवः।अष्टारचतुर्दशेनअष्टदल
स्वभ्यन्ते।अथशङ्खेनपञ्चत्रयलक्षणेनअन्तःकष्ठाश्रयपात्रशाखाकमित्यर्थः।त्रिवलयमेखलाणांवलयानांसमाहारस्त्रिवलयंत्रिमेखलमित्यर्थः।त्रि
रेखाप्राकारचतुष्परतः।भूपुरमित्यपिमित्यर्थः।एतत्सर्वपुरमित्यचतुर्दशारसमाप्तौविंदुत्रिकोणवसुकोणदशारयुग्ममन्वस्रनागदलसंपुरमण
दशारंरजमित्यपुरयुग्मपीठस्वचतुर्दशःश्रीचक्रमनङ्गुलिंपरिदलनायः।श्रुतिरपि।सनकादिऋषयःसगमनेनसंहारेनगरेनवेति।अस्यार्थः
सनकादिः।चतुर्दशारमित्यर्थः।ओङ्कारवर्णलोपः।अष्टारगमंअष्टारैःघकारेवर्गःपद्मेःसिद्धिःगमं।नानीमानिभेदानिमगतानिपुरेन
गरंश्रीचक्रसंज्ञार्थं।संहारक्रममित्यर्थः।पञ्चिमाग्निमहेश्वरान्तानित्यमित्यवद्विंशतिसंधानः।केचित्वेयमाप्तमेन।संहार
क्रमेणाऽवलोकनीयमिति।तन्न।कोऽयमनवसंहारक्रमेणचक्रस्यावलोकनीयताइति।भक्तनमनुसरामः।नाडिःसार्धसहस्रगवलयाः
शरणकोणाः।शरणंगृहंचेतत्स्थानंकोणाश्चेतिद्वंद्वः।ततःकोणाःचतुश्चत्वारिंशदित्यर्थः।ननुविंदुत्रिकोणस्यादिक्रमेणाष्टमणि
दुष्ट्वायोगेनषट्चत्वारिंशत्कोणाः।विंदुपरित्यागेनपञ्चचत्वारिंशत्कोणाइतिचेन्न।प्रस्तारसूत्रत्रिकोणस्यास्तिरिक्तकोणद्वयं।अष्टको
णंतर्गतंनवनवकोणाःत्रिचत्वारिंशदित्यर्थः।शरणंसार्धकोणाइतिद्वंद्वः।पञ्चाशत्पञ्चचत्वारिंशदितिपाठान्तरं।नवयोन्यात्मकत्वं।पारि
नाः।परिणामंप्रागामाः।अयमर्थः।[illegible] णिअष्टकोणादूर्ध्वपाशादश्मरवर्ग

यु.टी.टी.

२१

सितपद्मपुरमिति यान्मकानिवलारित्रिकोणवसुइत्रमखःत्रिनयंभूगहंशुवनाश्रकेअंतर्गतं परिणतमिद्युयते।एतत्पूर्वमेवप्रति
पादितं।अथैषं पदयाउना।हेमगवनिवनुर्दिः श्रीकंठः शंभुः सकाशात्मप्रिनाभ्यिः शिवपुत्रनिम्बिर्नवभिरपिकूलमष्टानिभ्यिः नवधा
रणकोणाः मिवलयमिरेखाभिः सार्धपरिणताः संतन्वनुरेखा रिशैद्विनि।अमेडमनुसंधेयं।शक्तिवक्रे अष्टाविंशतिमर्मस्थान
निसंधिपपश्चतुर्विंशतिः।त्रिरेखामेलनस्थानं संधिरिसुस्थिीयते।त्रिरेखामेलनस्थानं मर्ममर्मविदोविदुरित्युच्यते।नन्वथं अष्ट
इतपाउशाडमखत्रिनयभूपुरेयाणांशिववक्राणां त्रिरेखासंगमस्थानानां च पिशवने मर्मत्वा।यथोक्ते वेदविपाणां।मन्त्रसहितशा
रपकोणरमचतुष्टयं।अष्टाविंशतिमर्माणि चतुर्विंशतिसंधयइति।अस्यार्थः।चतुर्दशकोणराशरपुग्मअष्टकोणत्रिरेखासंगम
स्थानगणनायां चतुर्विंशतिमर्मस्थानानि रन चतुष्पनरीवक्रामके न सार्धं अष्टाविंशतिरिति।एतन्सर्वंचक्रलेखनाप्रकारे तनुद्
र्शयमिति।तस्प्रकारोनिरूप्यते।सव द्विविधः।सृष्टिक्रमः संहारक्रमश्चेति।संहारक्रमश्च कौलमार्गे एव तथापि तत्पानिपरिहानार्थं
सप्रकारोनिरूप्यते।पुरतोरेमाल्क्रियेतन्मध्येतत्रेखाल्लिखिता पश्चिमरेखाग्रेनाभ्यांत्रिकोणमुन्मापअष्टम्यायाऊयनप्राक्रहितीय
रेखाग्रेनाभ्यांत्रिकोणमुन्मापपष्ठ्यायाऊयनरएवंप्राक्रेखाग्रेनाभ्यांत्रिकोणमुन्माप्रसापञ्चयासप्तम्यायाऊयनपश्चिमद्वितीयरेखाग्रे
नाभ्यांत्रिकोणमुन्मापाष्टम्यायाऊयनप्राक्रहितीयरेखाग्रेनाभ्यांत्रिकोणमुन्माप्रसापञ्चयाष्टम्यायाऊयनततःपश्चिमरेखाग्रेनाभ्यांचतु
णमालिखेत्ततःषट्कोणमध्यस्थितःसहस्ररेखाग्रेनपश्चिमरेखाग्रेनाभ्यांत्रिकोणमुन्माप्रसापञ्चयापञ्चम्यायाऊयनरएवंप्राक्रेखा शिव.
ग्रेनाभ्यांत्रिकोणमुन्माप्रसापञ्चयापञ्चम्यायाऊयनमध्यस्थितानामित्रसरेखाग्रेनाभ्यांत्रिकोणमुन्माप्रसापञ्चयान्तनीयरेखयायाऊयन २१

एवं चतुर्विंशतिमर्माणि चतुर्विंशतिसंधयः। नवयोनिचक्रे नवकोणमनरहस्यं। स्फटिकमलसमप्रभार्गः सर्वनिरूपणे। आग्नेत्रिमे
णमुल्लिख्य तन्मध्यबिंदुं निक्षिप्य बिंदुपरित्रिकोणं त्रिकोणानंतरं मागमेखलिख्य प्रथमां त्रिकोणाग्ने त्रिकोणान्ते पश्चिमाग्रमुल्लं
लिखेत्। एवमष्टकोणचक्रमुत्पन्नं तस्माद्दशारमुत्पाद्यते तन् यथा। अष्टकोणाग्रात्पश्चिमरेखाभ्यां षट्कोणमुत्पाद्य विलिख्य
नमर्मस्थानेभ्यः त्रिकोणान्युत्पाद्य एकोणगतथा नेहपरिदक्षिणोत्तरायनारेखा ईशानाग्निकोणाभिकोणगुणा उत्पन्नो दशारः। दशारेण तन्निलाई
दशारान्तर्गतकर्मणा दशारान्तरमुत्पाद्यते तन् यथा। प्रथमदशारस्य पूर्वपश्चिमरेखाग्राभ्यां षट्कोणमुत्पाद्य षट्कोणानन्तरं नमर्मस्थानेभ्यः
त्रिकोणचतुष्कमुत्पाद्य तन्नः उपरि तिर्यक् नमर्म चतुष्टयात् दशारस्याग्नेत्रिकोणचतुष्कमुत्पाद्य प्राक्पश्चिमरेखामण्डले। एवं प्रथमनाभि
शत्कोणाः चतुर्विंशतिसंधयः चतुर्विंशतिमर्माणीति एतत्समयमतरहस्यं। अस्मिन्मते त्रिकोणमूर्ध्वमुखं लेखनीयं। कौलचक्रे त्रिकोणम-
ध्यगतो बिंदुः समयचक्रे तु चक्रोणमध्यगतो बिंदुः। कौलचक्रे कोणसंख्या नास्ति नवत्रिकोणात्मकत्वात्। नवानां त्रिकोणानां मेलनेन मर्मसं-
धयश्च उत्पद्यन्ते इति महद्रहस्यं। उभयचक्रसाधारणं अन्तर्दशमष्टदलपद्मं ततः षोडशदलपद्मं ततो मेखलात्रितयं ततश्चतुर्द्वारयुक्तं
पुरं भवतीति श्रीचक्रोद्धारविज्ञानम्। अत्र मेरुप्रस्तारः कैलासप्रस्तारः भूप्रस्तारः त्रयः संकेताः। मेरुप्रस्तारो नाम नित्याषोडशिकात्म्या।
कैलासप्रस्तारो नाम मातृकात्मकत्वं। भूप्रस्तारो नाम वशिन्याद्यात्मकत्वं। एतच्चतुःषष्ट्यां नैवेति निश्चीकृत्याख्यानावसरे निरूपणतरगुणाधि-
विधामः। अत्र रुद्रयामले शिवोक्तः ... यानाम मन्त्रः सर्वविद्यासमाख्यानं। संवमानाश्च ... देवगंधर्व ... तां। अन्तर्याम

सौं॰टी॰टी॰

१२

मकं चक्रं मन्वीत्समयं जगात्। अन्वार्थं नवश्चक्रानुरञ्जीषाममयःस्वनः। भिखंडमान्कावकेतामयर्पनजान्मकं। त्रिकोणं वैंदवस्थानं मध्यकोणं नमिश्चकं। सोम
वनुईशारं सह्रलुवनुस्वके वसानुमन्। एनम्मसाहाहृदणावसगोगौ महद्गणाः। षषसम्हाल्याकल्पिनं त्रिपुरावक्रसेवकाः। पुरत्रयं वक्रस्य सामहृ
यनिश्चात्मकं। महालक्ष्मीपुरं चक्रं नमै वालसैदेन याणिवः।११। त्वदीयमिति। त्वदीयं त्वसंबंधि सौंदर्यं लावण्यं। तुहिनगिरिकन्ये। तुहिनयुक्तो
गिरिः तुहिनगिरिः। तस्य कन्या पुत्री तस्याः संबुद्धिः हे तुहिनगिरिकन्ये। तुलयितुं तुलयासंमितं कर्तुं कवींद्राः कविश्रेष्ठाः कल्पंते शक्नुवंति कथम
पि कथंचिद्विधिविरिंचिप्रभृतयः। यत् यस्मात्कारणात्। आलोकौत्सुक्यादालोकनं तस्मात् यो लोकयत्यौत्सुक्यं तस्मात्। ल्यब्लोपे पंचमी औत्सु

त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः।
यदालोकौत्सुक्यादमरललना यांति मनसा तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीं।१२।

मवलंब्य। यदा निमित्ते पंचमी। अमरललनाः देवस्त्रियः यांति प्राप्नुवंति। मनसा अंतःकरणेन तपोभिर्दुष्प्रापां प्राप्तुमशक्यां अपि विरोधे। गिरि
शसायुज्यपदवीं। अयमेव पदयोजना। हे तुहिनगिरिकन्ये त्वदीयं सौंदर्यं तुलयितुं विरिंचिप्रभृतयः कवींद्राः कथमपि यत् अमरललनाः आ
लोकौत्सुक्यात् तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीं मनसा यांति। अयमर्थः। शाणीपतिप्रभृतीनामपि त्वत्सौंदर्यस्य इयत्तां न परिकल्प्य व
र्णयितुमशक्यत्वेन सदृशवस्त्वंतराभावात्। उर्वशीतिलोत्तमादीनां त्वत्सौंदर्यलेशस्यापि दूरतरत्वात्तासां। अथानन्वयालंकारो ध्वन्यते। लोके
न कापि वैतुल्यवस्तुनः संभावात् तस्याः स्वयमेव तुल्यमिति निगर्भगतेः।१२। श्रीशिवायनमः। सांबशिवायनमः। श्रीगणेशायनमः॥ शिव॰

१२

नरं मनुष्यमात्रं। वर्षीयांसं अतिवृद्धं नयनविरसं नयनाभ्यां विरसं काणं कामिन्यः पश्यतोऽपि नयनयोः तापकं नर्मसु परिहासेषु जडं अतिवृद्धत्वेन अ-
गाल्भं कटाक्षवीक्षणे पतितं गोचरीभूतमर्थः। अनुधावंति अनुधावमानाः शतशः शतसंख्याकाः। सहस्रशः संख्यातीता वा युवतयः। गलद्वेणीबंधाः।
गलंतो वेणीबंधाः कबरीभारा यासां ताः। कुचकलशविस्रस्तसिचयाः कुचकलशाभ्यां विस्रस्ताः सिचयाः वस्त्राणि यासां ताः। हठात्त्रुट्यत्कांच्यो
यासां ताः गलद्रशनाः हठात् रशनादाम इत्यर्थः। विगलितदुकूलाः। विगलितं दुकूलं कटिक्षौमं यासां ताः। युवतयः तरुण्यः। अयमर्थः

नरं वर्षीयांसं नयनविरसं नर्मसु जडं तवापांगालोके पतितमनुधावंति शतशः।
गलद्वेणीबंधाः कुचकलशविस्रस्तसिचयाः हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः॥१३॥

व्याख्या। हे भगवति नरं वर्षीयांसं नयनविरसं नर्मसु जडं तवापांगालोके पतितमनिशं शतशः युवतयः गलद्वेणीबंधाः कुचकलशविस्रस्तसि-
चयाः हठात्त्रुट्यत्कांच्यो विगलितदुकूलाः सत्यः तादृशं नरं मदनमत्तविशेषः। अनुधावंति। एतादृशमहिमानमयायाः सुरं विशिखत्वेनिर्-
व्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥१३॥ क्षितौ पृथिवीतत्त्वयुक्ते मूलाधारे षट्पंचाशत्। षट्संख्याधिकपंचाशत्। द्वाभ्यां
समधिकपंचाशत् उदके उदकतत्त्वयुक्ते मणिपूरे। हुताशे वह्नितत्त्वयुक्ते स्वाधिष्ठानचक्रे द्वाषष्टिः। द्वाषष्टिरवशिष्टा संख्या यासां

न्तो सर्वेषामिति क्रमेण द्विशत्योत्तरस्याकारः। वसुरधिकपंचाशत्। वसुः संख्यया अधिकाः पंचाशत्। अनिले गाङ्गुलत्वयुक्ते अनाहतचक्रे
द्विविआकाशेमल्लयुक्ते विशुद्धचक्रे द्विषट्त्रिंशत्। द्विरदनाः षट्त्रिंशत्संख्याकाः द्विसप्ततिसंख्याका इत्यर्थः। मनसि मनस्तत्त्वयुक्ते आज्ञाचक्रे
वसुः षष्टिरित्येवं प्रकारेण यथा प्रसिद्धाः शास्त्रेषु स्वस्वपतत्त्वेन योगिनां प्रसिद्धाः संनिनेप्यामयूखानामुपरि सहस्रदलकमलवर्तिनं द्विविधान्मुकुन्द
इत्यपरनामकं सुधासिंधौ न्तवंध्वस्ताः पादांगुष्ठयुग्मं। एवं सामग्र्या इति शेषः। अत्रार्थे पद्यौ ऊना। हेडामयनियममयूखाः क्षितौ षट्पंचाश
न्उदके द्विसमधिकपंचाशत् ऊनाशे द्विषष्टिः अनिले वसुरधिकपंचाशत् द्विविद्धिः षट्त्रिंशन्मनसि वसुः षष्टिरिति निनेयामयूखपरिनव

क्षितौ षट्पंचाशद्द्विसमधिकपंचाशदुदके हुताशे द्विषष्टिर्वसुरधिकपंचाशदनिले।
द्विविद्धिः षट्त्रिंशन्मनसि च वसुः षष्टिरिति ये मयूखास्तेषामप्युपरि तव पादांबुजयुगं।१८।

पादांगुष्ठयुगं वर्तते। अत्र षट्पंचाशदित्यादि संख्यादिशब्दानां संख्येयपरत्वेन संख्यानां मयूखानां वर्तनात् एकवचनांतत्वमेव। यथा विंशत्या मतः
सहैकत्वे संख्याः संख्येयसंख्ययाः। संख्यार्थे द्विबहुत्वे तास्तासु चानवतेः स्त्रियाः इति संख्येयवर्तमानसंख्यानां नियमप्रसक्तेः बहुवचनांत
त्वसिद्धिः। अत्र हेतु। षट्पंचाशदित्यादि संख्यानां संख्येयविशेषणत्वेपि न शुक्लादिगुणवाचित्वं। यथाह पद्ममंजरीकारः। विंशत्याद्याः गुणाः
न शुक्लादिभिः गुणैः समानधर्माणि इष्विति मे इति। विंशत्याद्या हि नावित्वपृथक्त्वयोगिषु द्रव्यवर्तनेन इति व्यासस्य नन्वयः शुक्लाद्य अतुमत शिव·
रूपर्यवसायिन इति। अत्र हेमन्त रहस्यः संख्येयपरत्वात् संख्याशब्दानां बहुवचनं तत्र षट्पंचाशतामयूखा इति मध्ये विंशतुं रशानामरनिसहस्र २३

संख्याकाङ्क्षेवपुः। अतोनविवक्षितार्थसिद्धिरितिनियमफलमिति। अत्रेदमनुसंधेयं। आधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञात्मकं श्रीच ता
क्रमितिसंज्ञेषामस्यसूर्याग्निसोमात्मकमिति स्वाधिष्ठानचक्रद्वयमग्निखंडं। मणिपूरानाहतचक्रद्वयमर्कखंडं। प्रथमखंडपरिअग्निस्थानं तद्द्वयमध्ये स्थितत्वात्।
द्वितीयखंडपरिसूर्यस्थानं तद्विष्णुग्रंथिस्थितत्वात्। तृतीयखंडपरिचंद्रस्थानं तद्ब्रह्मग्रंथिस्थितत्वात्। सा समष्टिः सूर्यानलात्मकमिश्रचक्रं तोहकमणसंव
नव्यं। तत्र प्रथमखंडपरिस्थितो वह्निः ज्वालाभिः प्रथमखंडमावरणाति। द्वितीयखंडपरिस्थितः सूर्यः स्वकीयैः किरणैः द्वितीयखंडमावरणाति। तृ
तीयखंडपरिस्थितः सोमः स्वकीयाभिः कलाभिः तृतीयखंडमावरणाति। आधारचक्रमहीतत्त्वात्मके वह्नेः षट्पंचाशज्ज्वालाः। मणिपूरके जलतत्त्वात्म
के स्वाधिष्ठानेपि पंचाशज्ज्वालाः। एवमष्टोत्तरशतं वह्निज्वालाः। सूर्यस्याग्नितत्त्वात्मकत्वात्। स्वाधिष्ठाने द्वाषष्टिः किरणाः। अनिलतत्त्वात्मके चक्रे
षट्पंचाशज्ज्वालाः मणिपूरके जलतत्त्वात्मके अनाहतचक्रे चतुःपंचाशत्किरणाः सूर्यकिरणानां मणिपूरं विहाय स्वाधिष्ठाने प्रवेशः। सूर्याग्न्यारकत्वा
न। सूर्यान्तर्भावात् अनस्य स्वाधिष्ठानमणिपूरयोः सूर्याग्निस्थानयोर्मध्ये अग्निस्थाने सूर्यप्रवेशः सूर्यस्थाने अग्निप्रवेशः। अगहदनानिशमनसंचरंमेपात्म
क सूर्यकिरणाग्निवर्षामिस्पर्धे। एतच्च नडिलनशत्स्यसाहित्यलोकव्याख्यानावसरनिपुणतरमुपपादयिष्यामः। एवं सूर्यस्य षोडशोत्तरशतं किरणा
एवंविधस्य विषतत्त्वात्मके विशुद्धचक्रे द्विसप्ततिः मनस्तत्त्वात्मके आज्ञाचक्रे चतुःषष्टिरेव। एवं चंद्रस्य षट्त्रिंशदुत्तरशतं कला एव। यथा कमेरवया
मल्लेरवाष्टकप्रस्तावे। अष्टोत्तरशतं वह्नेः षोडशोत्तरशतं रवेः। षट्त्रिंशदुत्तरशतं चंद्रस्य चेति निर्णयः। एवं सोमसूर्याग्न्यात्मकाः पिंडब्रह्माण्डआदिस
वर्णेन। पिंडब्रह्माण्डयोरकत्वात्। पिंडाण्डगतश्रीचक्रब्रह्माण्डगतशक्तिरिति रहस्यं। एवं पिंडाण्डमारभ्य वर्णनेन सहस्रकमलं ज्योतिर्मयलोकः। तच्चावरणसंघ

14

९

मानित्यकल्पः एतद्वन्नवासावक्रमितिभ्रोऽहस्मारव्यानावसरे निपुणतरमुपपादयिष्यामः। आत्मावक्षोपारेक्षितः संहृद्दश्यिमयदुक्तं ननु वंद्दकल्पस्तानस
मं ननु वंद्वस्सकृतमिति। यनुस्तु स्त्रगाद्यपाडशहस्तनाषाडशनित्यात्मकत्वान्न षाम्निपराद्दिश्कस्वपक्षस्वपक्षनित्यात्मत्व मारहिमयसूक्षा
नवंद्वस्यापिसहस्रकमलगतस्यरश्मिभयोजन एवेतिननुवंद्दस्यनरूहिभयोजनः किंतु षोडशनित्यात्मकाः षोडशवंद्दाः षोऽनित्याद्दिपोणमास्य
न्ततिथिप्रवर्तकाः। नथेवामावास्यांतरूक्षमतिपन्नभृतितिथिप्रवर्तकाः स्वात्मनिराधानानिराधानाभ्यामितिमंत्रापद्दहस्यमिति। इदमत्रानुस
धेयं। श्रीविद्यामाः वंद्दकलावनानामधेयाः पवद्दशतिथिरूपत्वानषत्रुत्तरशतिशतमयरवाः द्विवसात्मकाः। नवसधूत्सो लक्ष्यनन्तस्यकाल
शक्त्यात्मकसंवत्सरस्य मण्डापतिरूपत्वान्नमण्डापजनगलकृत्वात्मकत्वान्। श्रीवीनाम्न यदुन्यापितितिनिल्ज्यकर्तत्वं। तेवमरीचयः आत्मि
नवधासाकपिंडस्वषत्रुत्तरशतिशतसंख्याकाः। एवमनंतकोटिवस्ताउष्पुपिंडाउन्व एवमनवधानिमत्वाउषुष्टुत्तरद्विशतसंख्याकाः मयू
खाः अननस्वनवमरीवमयूखाः सूर्यवंद्दाग्निसंबन्धाः एतेवमयूखाः सूर्यांग्निपात्ररविंद्दसन्मानत्वादय्योकाव्यमकाश्यमिअयव
ह्मकस्यद्वारमार्विमित्यपिमितिश्रुत्या मयूखाःसगवंत्निपाद्दाविंद्दसंक्रमुक्तं। तथैवोक्तमरीचयः षाषंडवाद्दस्तुस्वात्तषाम
रीवीनांस्ववाद्दिकर्तृत्वं। एतद्दुक्तं भवति। सर्ववंद्दाग्न्यः सूर्यावनिपातरविंद्दाः अनंतकोटिकिरणमध्येकत्विपयानरस्कृपाना
नाहस्यमगवतिषसाहस्रमासाद्दितसूगस्वकाशकत्वसामर्थ्यां सूगं निविकाश्यपैमितिअनवसर्वलोकानिकांनेचंद्रदकलास्वयंदवाप
स्वानमितिनित्यवर्तनंचरणांबुजंमन्येककादिवसांउवधिजन्ममूखानामुपर्यवर्तमानत्वात्तेषामणुपरिलवपाद्वुजंवर्तनेसिद्धात्

शिव॰

१४

वाग्भेनत्वारोपसूत्तुनिर्तिनीत्सनुसंधेय।यथोक्तंवैदंपयामवैसंदुज्ञानविधायांगायींमतिमहेश्वर्यो।साधुसाधुमहाभागेपृष्टंवैलोकस्यसु
द्दरि।गुह्यात्गुह्यतमंज्ञानंनकुत्रापिप्रकाशितं।कालाविद्यापराशक्तिःभावक्तारस्वरूपिणी।तन्मध्येवेदवक्तानंतत्वात्मपरमेश्वरी।स
ह्मशिवेनसंयुक्तासर्वतत्वानिगासती।वक्तंत्रिपुरसुंदर्याःश्रीलोहाकारभीश्वरः।पंचम्नाम्नकंवेगुणभ्राज्ञानात्मकंएमेवच।इंद्रियात्मक
मकंवमनस्तत्वात्मकंतथा।मायादिन्नतत्वरूपंचनतत्वानीमंवचेदवं।वेदवक्तुंगदुन्मानिस्थितिसंहाररूपिणी।सहाशिवेनसंयुक्तातत्वानीमात्म
रश्वरि।ज्ञानीरूपापराकारामृत्साद्याहाद्भवासप्रशिव।किरणाश्वसहस्रंचद्विसहस्रंचलक्षकं।कोटिअर्बुदंमनेषांपरासंख्यानकथ्यते
नामवानुघविश्वेवब्रह्मांडकोटयश्चराचरायस्याहस्यामहश्चानिश्रानासर्वसंविडासनो।तज्ञासारक्तंनंकिंबिंतनुमवप्रकाशतं।तस्याश्चरि
रश्मस्याश्चविदुपायारूपंचेविना।आद्यमापश्यनेत्रनेंऽगद्देनवृणवुर।तेषामनंतकारीनामभूतानांमहेश्वरी।मध्यषष्मुनरंतेमरीचयः
नंकिरणाःशिवेपश्ताडंयत्तुमानालसामस्थानिकात्मकाः।अग्नेरष्टावरशानकाडशामृरककरवः।षाडंनिशाकुत्स्रशतंचंद्रस्यकिरणाः
शिवे।ब्रह्मांडंज्ञासपेतत्तत्पिपिंडऽग्रपिशतकेर।द्विशास्ततलभागासामावङ्क्तिश्चसप्तमाः।प्रकाशयंतेक्ताोत्स्मनस्मात्कालात्म
कथः।षष्मुनरंचशिश्तंद्विनान्नेवचतुरापथः।हासनात्मामहाहवःप्रजापतिरितिश्रुतिः।प्रज्ञापतिर्लोकनामरीचित्रंसुरसात्मनीन्द्र।
सृज्यतेलोकपाल्यासेसर्वेञकरद्याहा:।संहारश्चापरायणःद्युम्नामिर्बभिविभिना।रश्मानुमडसंलग्नातत्प्रतिष्ठितिःडघेःशिवा।लिपु
क्रःपरमेशान्यात्ऽगद्देतनरवतंत।।तामेत[illegible]ाभिसर्वे।[illegible]ामाम्रवसिहंभिञानानीसुसर्वभंत्री

१५ मारभ्य नमो योगमाह । शरदिति । शरत्कालज्योत्स्नावच्छिकालदक्षभां शुद्धां । शशियुतजटाजूटमकुटां । शशियुतो जटाजूटो एव मकुटः सा
नां चंद्रकलायुतं सामित्यर्थः । वरत्रासत्राणस्फटिकघुटिकापुस्तककरां । वरः इष्टार्थप्रदानमुद्रा त्रासत्राणं अभयमुद्रा स्फटिकघुटि
का पानपात्रं स्फाटिकघुटिका अक्षमाला निर्यात्य करा केचित्पुस्तकं विद्युन्मालामुद्राश्चैते पुस्तकाः करा यस्याः सा शाकपार्थिवादिसमासः
मुद्गरपट्टलोपः । वरत्रासत्राणस्फटिकघुटिकापुस्तकानि करे यस्याः सा इति समासः कुण्डलिका ।। प्रहरणान्युपमङ्गलानि भिन्नस्य

शरज्ज्योत्स्नाशुद्धां शशियुतजटाजूटमकुटां वरत्रासत्राणस्फटिकघुटिकापुस्तककरां ।
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः ॥१५॥

हरणादिष्वपि एवं निपुणकृतानुकरणं निषेधार्थः । ज्ञात्वामित्यर्थः । नत्वा नमस्कृत्य कथं कथं सन्निदधति वाक्यालंकारे सतां स
ज्जनानां सन्निदधते सन्निधानं भजन्ते । मधुक्षीरद्राक्षाः मधुरमधुरीणाः मधुः क्षौद्रं क्षीरं पयः द्राक्षा मृद्वीका तेषां मधुरिमा माधु
र्यं तस्य धुरं वहन्तीति मधुरीणाः अतिशयतः फणितयः वाक्यसमर्थः । अयमर्थः प्रकाशते शरज्ज्योत्स्नाशुद्धां
शशियुतजटाजूटमकुटां वरत्रासत्राणस्फटिकघुटिकापुस्तककरां त्वां सकृन्नत्वा मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः कथ
मिव सतां सन्निदधते । अनन्यस्मिरेकपुस्तकं सकलं मनस्कारतादिकविद्वत्त्वं संस्कारमात्रकः । न इत्यादिप्रकारान्तरेण वनकेनापि निर्मि

16

कर्षं प्रणामिनि। कर्षीं इत्यां कर्णशिखराणां वेनः कमलवनबालातपरुचिं वेनांस्येव कमलवनानीति योजनं नवबालातपरुचिं अंजनेये
सेनः समुरुपाः कतिविद्विरलाः अरुणामेव आरुणाख्याजवतीं विभिः विद्वे श्रवणः येयसीमरयतीनयाः अरुणन शृंगारलहरीग
भीराब्धिः । तरुणनर अभियोजनं । यद्वा तरुणोवासो शृंगाररवनस्यलहरी उद्गमप्रवाहः । यद्वा लहरीशब्देन तरंग इत्य मसमुद्रस्य यादृश उत्कर्षः स
उच्यते । लहरीयुक्तगंभीराब्धिः अतिगंभीराब्धिरित्यर्थः । वाग्भिः वाग्विलासैः विदधति कुर्वन्ति सतां सज्जनानामहारंजनं हृद्यानुरंजनं अमी सन्तः प्र
मश्येन । अत्र श्लेषे पदयोजना । हे भगवति कर्षीं ह्रणावेनः कमलवनबालातपरुचि अरुणामेव जवतीं कति विलसन्तः अंजने अमीसनः विरिंचि

कर्षीं ह्रणावेनः कमलवनबालातपरुचिं अंजनेसनः कतिविदरुणामेव जवतीं । पे
विरिंचिप्रयस्याल्लरुणनरशृंगारलहरीगंभीराब्धिर्वाग्भिर्विदधति सतां रंजनममी ॥१६॥

प्रयस्यातरुणनरशृंगारलहरीगंभीराब्धिर्वाग्भिः सतां रंजनं विदधति । अयमर्थः । हृदयकमले भगवतीमरुणाख्यां यन्तः पुरुषमापन्नासर
त्वत्रीश्व शृंगारप्रधानैर्वाग्विलासैः सभारंजनं कुर्वन्ति गुणवत्याः मात्रकांत्यकलान्सरत्वनीरूपत्वेन वसारत्वेन भद्रत्वं अरुणावर्णध्याने अमाप
शृंगाररसप्राधान्येन वाग्विलासप्रवर्तिरिति । यथोक्तं वामकेश्वरतंत्रे । अरुणाख्याभगवतीमरुणाभां विचिन्तयेत् । पाशांकुशधरां देवीं धनु
र्बाणकरांशिवां । वराद्यभवहस्तां वपुलकाप्रसमन्वितां । अष्टबाहुं त्रिनयनां लवतीमभवांभुधौ । सकरात्सवश्यृंगाररसात्ताइनलेपपन्न । स
ज्ञासहृल्पथासर्वाः साधके ड्रः सन्नास्तुल्यमिति । अत्र पशींपरिनरूपकमलंकारः । बालातपरुचिनाराप्रणप्रभिनेन सिक्कमलवनेनारापणा

सवित्रीभिरिति। सवित्रीभिः जनयित्रीभिः वाचां गिरां शशिमणिशिलामणि। भञ्जगरुचिभिः चन्द्रकान्तशकलतुल्यकान्तिभिः। इन्दुकान्त
२६ कान्तमणीनां मणिविशेषखण्डवच्छ्रुभ्रकान्तिभिः वशिन्याद्याभिः वशिनीप्रमुखाभिस्सह तु हे सविता नो वक्त्रश्रीभिः वशिनी आदयो यासां ताः शब्द
या वशिन्याद्याः यामिन्याद्याः श्रीगन्धाकर्षिण्यादयः वशिन्याद्याः ए कस्याः अष्टधा स्थिताः। वशिन्याद्याः एवंविधाः। वशिन्यः कामेश्व
री मोहिनी विमला अरुणा जयिनी सर्वेश्वरी कौलिनी कालिनी एता मिलिताः भगवती महमाह्वः अन्तेवासिन्यः सह विनयति यः सा
धकः। काव्यानां प्रबन्धानां भवति महतां महात्मनां काव्यानां प्रभृतीनां भङ्गिरुचिभिः भङ्गीनां रचनानां रचनाविशेषाणां रुचिभिः वचोभिः
वाग्विलासैः। वाग्देवीवदनकमलामोदमधुरैः। वाग्देव्याः सरस्वत्याः वदनकमलस्य आमोदः परिमलः तेन मधुरैः अमन्देः पुष्प
वमापन्नायाः सरस्वत्याः वाग्विलासैः सह इत्यर्थः। अन्नं पंचदशाक्षरा। हे भगवति वाचां सवित्रीभिः शशिमणि
शिलाभङ्गिरुचिभिः वशिन्याद्याभिस्सह त्वां यः संचिन्तयति सः महतां भङ्गिरुचिभिः वाग्देवीवदनकमलामोदमधुरैः वचोभिः।
काव्यानां कर्ता भवति। अन्न कमनुसंधेयं। वशिन्याद्याभिस्त्वामिति सगर्भं गम्यत्वाः स्वरूपमुच्यते। भगवत्याः स्वरूपं तु पंचदशाक्षरात्मके
मातृकायाम् एव। तन्त्रराजोक्तिः शक्तिः का मन्त्रस्याक्षरोच्चयात्मकं तत्त्वानां वसन्ति पंचविंशतये। वशिन्याः पंचाशद्वर्णात्मकमातृकाष्टवर्गात्मकाः
भवन्ति ते चाष्टवर्गाः अकचटतपयशाः इत्यष्टवर्गाः पंचपंचमः पाश्चमः पंचपंचः पाश्चात्य चत्वारः सप्तमः शान्ताः पंचमः एकमष्टवर्गात्मकं
भवति। मातृकामिश्रसमुद्दीपकाराद्यैर्वर्गैस्तु यथाक्रमं वशिन्याद्याभिः शक्तिभिः संयोजिता विंशतिकोणात्मकाः नानाविधशब्दरचना टीट·
२६

नेत्रद्वयविशेषात्मकगर्भवर्तीति चत्वारः कं चतुरस्रमस्तु कोणद्दशारद्विनय चतुर्दशकोणात्मके भुसप्तचक्रे भुवोक्तिनासनीज्ञ्यान्मनार्यकर्ष
न संवाहिका। वशिन्याद्याभिस्त्वां हि शारदेन कामेश्वरीप्रभृतीनामष्टानां सम्रहेण गंधाकर्षिण्यादि चतुर्दश सम्रहणकं तेभिसुकं वशि
न्यष्टकं। योगिनी क्षमदेश रूढेत्तु। विषयोगिनी रेचिकायोगिनी मोचिकायोगिनी अमृतायोगिनी दीपिकायोगिनी ज्ञानयोगिनी आ
प्यायिनीयोगिनी व्यापिनीयोगिनी व्योमरूपायोगिनी सिद्धरूपायोगिनी लक्ष्मीयोगिनी एवमष्टादशयोगिनीभिः सार्धं वशिन्यष्टक
मिलित्वा विंशतिकलाश्च वेनि नाविंशतिकला: शुद्धस्फटिकसंकाशाद्द्वारपुष्पमध्यकायोपविंतनीयाः। उक्तं कल्पसूत्रे:। अयं च मन्त्र

सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिर्वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः।
स कर्ता काव्यानां भवति महतां भङ्गिरुचिभिर्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः॥१७॥

त्वार मन्त्रद्रः भुमण्डलात्तरत्वात्: पञ्चाते नेरिस्या क्लोक याख्यानाय सवित्रीगुणनरं निरूपयेत्। गंधाकर्षिणी रसाकर्षिणी रूपाकर्षि
णी स्पर्शाकर्षिणी चतुर्द्वारे पुष्पाद्याः। उक्तं कल्पसूत्रे:। तथा च श्रुतिः। गन्धप्रियाद्युपाधिर्वाणिर्गजन्यसुपुष्पाक्षेपिणी। इत्यदृशस्मदत्तानि
नामिहापुष्पविमर्शपा। गंधरसरूपस्पर्शा गन्धाद्यास्तान संग्रहीताः। तेनु गंधादीनां गंधाकर्षिण्यादयः अधिदेवताः संग्रहीताः। अत्रविनि
गंधाकर्षिण्यादिसप्तकानि चतुर्दशारपुष्पाः सा तां गंधद्वारं तुराधपर्णाद्युपधर्मासिद्धमन्यानामिति तिष्ठः। मिसनष्टां वित्तानुदसुत
पिणी कृशानिपणी गंधाकर्षिणी मिलित्वा। एवं कार्यद्वारेण सदीव्रा नाराहरूकलाउपकृतामि मन्त्रीवि

यां। गं भट्टारातिमिति। गं भाकर्षिणी वनुद्रवशिन्य एकं योगिनीक्षद्र शक्तं संगृहीतं। यथा वशंभुनाप्युक्तं। मातृका वशिनी मुख्या योगिनीभिः समन्विता। गं भा
कर्षकरी मुक्ता संसारे त्रिपुरा विका। अथ हमनुसंधेयं। वशिन्याद्याः शक्तयः पंचाशद्वर्णात्मिका इत्युक्तं। अत्र वशिनी शक्तिः स्वरात्मिकाः स्वराः षो
डश अकारादयः तेषां स्वरूपं सनत्कुमारसंहितायां पंचरात्रेप्युक्तं। संक्षेपेण कथ्यते। अकारशक्तिः अष्टभुजा पाशांकुशवरदाभयपुस्तकाक्ष
मालाऽऽरूढमंडलव्याख्यानमुद्राकराः एवमाकारात्मिकाशक्तयः षोडश वर्णाः इत्याकृति विशेषः। आकारात्मिकायाः शक्तेः मंडलमशीतियोजनायतमाक
रस्य द्विगुणं इकारस्य नवतिलक्षयोजनायतं ईकारस्य तद्द्विगुणं उकारस्य कोटियोजनापरिमितपरिणाहं मंडलं तद्द्विगुणमूकारस्य ऋकारस्य पं
चाशल्लक्षयोजनपरिमितं मंडलं तद्द्विगुणं ॠकारस्य लृकारस्यापि एवं एकारस्य सार्धकोटियोजनपरिणाहं मंडलं ऐकार ओकार औकारात्मनां सम
मेव एवकारेण बिंदुविसर्गयोरपि अकारमंडलादयः अमंडलान्ताः शक्तयः पाशांकुशाक्षमालाकमंडलुधराः अन्यस्त्वास्तु पाशांकुशाभयवरदकराः उ
माद्यास्तु पाशांकुशाक्षमालावरदकराः शकाराः क्षकाराः पाशांकुशशरासनपुष्पबाणयुक्तकराः एताः शक्तयः पंचाशद्वर्णात्मिकाः केचित्तु स्व
रात्मिकाः शक्तयः स्फटिकाभाः कादयो मादयान्ताः विद्रुमाभाः यादयो नव पीतवर्णाः क्षकारारुणवर्णः इति। अपरे तु अकारादयो धूम्रव
र्णाः काराद्ययोदशकाः सिंदूरवर्णाः डादिफान्ताः गौरवर्णाः बादिवान्ताः अरुणवर्णाः शादिसान्ताः कनकवर्णाः हक्षौ तडिद्भासौ। ऊकारस्तु ऊकारवद्व
र्णनिर्भरन इति वदन्ति। इदं सर्वाम्नायमतेनेन संदेष्टुं योग्यानां व्याख्यानानां च सरलं कृत्वा यां समष्टिं निरूपितं समष्टिः॥१०॥ श्रीसांबशिवायनमः

वशीकरणमाह। हे भगवति तनोः देहस्य छायाभिः कान्तिभिः। तेन तव देव्याः तरुणतरणिश्रीसरणिभिः। तरुणतरणिर्बालसूर्यः तस्य श्रीः शोभा तस्याः
सरणिभिः मार्गैः सौभाग्यमिति यावत् तथा सांनाभिः दिवमाकाशं सर्वामुर्वीं कृत्स्नां भूमिं तदुः प्रदेशमित्यर्थः। अरुणिमनि मग्नां अरुणामिति यावत् यद्वा
अरुणिमनि मग्नां निरन्तरमग्नां। यथोक्तं शम्भुना। पावकाब्धौ निमग्नायां दिवं भूमिं विचिन्तयेत्। तस्य सर्वा वशे याता त्रैलोक्यवनिता ध्रुवमिति। अ
रुणिमशब्देन पावकाब्धिर्लक्ष्यते। पावकाब्धिमध्यस्थितामित्यर्थः। स्मरति यः साधकः भवति अस्य साधकस्य त्रस्यद्वनहरिणशालीननयनाः
त्रस्यन्तो वनहरिणाः वनशकुः स्वच्छन्दचारिमृगास्तेषां नयनानि यासां ताः शालीनशोभमाननयनयासां ताः सलज्जा लोकाः। सह साकं उर्व

तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः।
18 भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः।१८।

श्या उर्वशी नाम गणिका तया वशं नीताः वश्याः। कति कति असंख्याः इत्यर्थः। गीर्वाणगणिकाः देववराङ्गनाः। अत्रेत्थं पदयोजना। हे भगव
ति तरुणतरणिश्रीसरणिभिः तनुच्छायाभिः सर्वां दिवमुर्वीं च अरुणिमनिमग्नां यः स्मरति अस्य त्रस्यद्वनहरिणशालीननयनाः गीर्वाणग
णिकाः उर्वश्या सह कति कति न वश्या भवन्ति। सर्वा अप्सरसो वश्या भवन्तीत्यर्थः।१८। मुखं बिन्दुं बिन्दुरूपं कृत्वा बिन्दुस्थाने मुखं कृत्वेत्यर्थः।
कुचयुगलमधस्तनयुग्मं अधस्तात् तस्य मुखस्य तदधः तस्य कुचयुगस्य अधः सृष्टेः हरार्धं हरस्य अर्धं शक्तिः त्रिकोणं योनिरिति यावत् ध्याय
ति चिन्तयेत् यः साधकः तत्र तस्याः हरार्धे हरमहिषि तव देव्याः मन्मथकलां कामराजबीजं स साधकः स घः तत्क्षणमेव संक्षोभं सर्वाङ्ग

क्षोभं नयति प्रापयति वनिताः इति शीघ्रः क्रियाविशेषणमेतत्। अतिलघु अतितुच्छं त्रिलोकीमपि त्रिभुवनमपि आशु शीघ्रं भ्रमयति रवींदुस्त
१८ नयुगां। रवींदू एव स्तनौ यस्या वसनानि यासां युग्मं यस्याः सा तां। अत्र भ्रंपदयोजना। हे हरमहिषि मुखं बिंदुं कृत्वा तस्याधः कुचयुगलं कृत्वा तद
धः हरार्धं कृत्वा तत्र ते मन्मथकलां यो ध्यायेत् स साधकेंद्रः सद्यः वनिताः संक्षोभं नयतीति यत् तदतिलघु किंतु रवींदुस्तनयुगां त्रिलो
कीमपि आशु भ्रमयति अत्र त्रिलोक्याः रवींदुस्तनयुगलविशेषणतत्त्वात्पर्यं। अयं मादनप्रयोगः स्त्रीवशप्रयोजक इति ज्ञापयि
तुं। अत्रेदमनुसंधेयं। साधकः त्रिकोणं बिंदुस्थाने साध्यायाः मुखं वक्रं ध्यात्वा तदधस्तात्कुचयुगलं तस्याः कुचयुगलस्याधः
तस्याः योनिं विविनयेत् तत्र वक्त्रकुचमध्ययोनित्रयस्थानेषु गमनादि नवींदुसंस्थितया ह्रीतया आत्मना साधकमपि विविनयेत् मु
खांके चतुःशल्या। बिंदुसंविम्बवक्त्रं तु तदधस्तात्कुचद्वयं। तदधश्च हरार्धं च विविनयेत्तदधो मुखं। तच्च कामकलाकृपां मकृणां वि
नयेद्विद्वान् तस्मिन् वहूपणानि रूपं विविनयेत्। एवमनकमादनप्रयोगः। सनत्कुमारसंहितायां सम्प्रत्यामुक्तं। अथ कविनिनिरूप्यते। बिंदुनद्ध
के मायां प्यनद्धा वाङ्युग्मकं। तदधः कुचयुग्मं तु तदधो योनिमंडलं। एतेन बुधवर्तुस्थाने पंचबाणानि विविनयेत्। वाङ्कुमध्यकुचमध्ययोनिमध्य य
थाक्रमं। ऐं क्लीं [illegible] क्लीं ब्लूं सः। इति विनयेदित्यर्थः। अयं प्रयोगः कामराजप्रयोगसमयेत्। त्रिकोणबिंदुस्थाने अधो वक्त्रं विविनयेत्। बिंदुरूप

मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलां।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां ॥१९॥

ग्रिमागेनुवक्ष्यते विंस साधकः। तदुपर्युपर्यभ्यासेन पंचसंख्यो रुद्रः। तदुपर्युपर्यनित्यक्रमशो भुवनेश्वरी। श्रीविद्याकामराजं वाग्भवलक्ष्म्याशु विं
नयेन। भयं प्रयोगामृतविंदुरुक्तं निप्रयोगादनिशाग्रकरः। अन्यापि पंचबाणप्रयोगः पूर्ववत्। एवमेतान्हशाण्यादिप्रयोगाः सनत्कुमारसंहि
तायामेव गतव्यानंधविस्तरभयान्नोक्ताः॥१९॥ किरंतीमिति। किरंतीं वर्षतीमंगेभ्यः किरणनिकुरुंबामृतरसं। किरणानां समूहो निकुरुंबं
समूहः तस्मात् अमृतरसः तं हृदि हृदयपद्मे त्वामाधत्ते ध्यायतीति यावत्। हिमशिलाकारमूर्तिमिव हिमकरशिलायाः चंद्रकांतमणेः मूर्ति
पुत्तलिका तद्वत् चंद्रकांतमणिनिर्मितविग्रहामिव यः साधकः सः सर्पाणां दर्पं शमयति। शकुंतानां पक्षिणामधिपो गरुडस्तद्वत् ज्वरेण संतप्तानां

19 किरंतीमंगेभ्यः किरणनिकुरुंबामृतरसं हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः।
स सर्पाणां दर्पं शमयति शकुंताधिप इव ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया।

गरुत्मद्गर्वक्षयकारित्वमात्रं न गतं। अपि तु न कार्यकारित्वं संभावितमिति गरुत्मान् भ्रूताग्रभक्षणात् गरुत्मानिव सर्पः। ज्वरेण कृष्ट
संतप्तान् दृष्ट्या वीक्षणेनेव। अमृतदृष्टिप्रयोगः कथितो। सुखयति सुखिनः करोति नरकरोगनिवृत्तिं विष्टब्धमानिपातिकस्वि
त्वं कथ्यते दिक्कोपः। एवं सुखयतीति रूपं सिद्धं। सुधाधारसिरया। आधारभूता अमृतस्यंदिका सुधाधारात्मिका यस्याः सा
नाडी सा निबद्धा सिरा। सिरयाः पुनश्चावितपुंस्कारिणा पुंवदभावः। सुधाधाराया सिरासिरा च सुधाधारसिरमयी। सुधासारसि
रयेति वा पाठः। अत्रेत्थं पद्यार्थोऽन्वयः। हृदि ध्येयः साधकः अंगेभ्यः किरणनिकुरुंबामृतरसं किरंतीं हिमकरशिलामूर्तिमिव

शि० दि०

१५

मिवहद्दित्वामाधुन्नेसः शङ्कुं नाधिपइवहद्द्यास ॥७॥ हर्षसुधा धारसिरपाद्द्यानुरसुष्टनसुरपमिाभूनेनरोकोकेन गाहड
मयागउकः । पथोनेवनुः शसांषण्मासध्यानयोगनऔपनेगरुडपमः । द्याकर्षपानेकोकेद्यवऊहनवरो । द्दसंभाम्
मन्नागानरक्षेवबहरद्दिपं । द्याबाततुर्भिकाशीं । यऋरान्नाशत्यनिक्षणाद्रावद्द्दानः शिलाम्ह्रिविनधिलाविनाशमलानु
पन्नरानशेषांरवशाश्रनाध्यांद्दवापरः । गरुडध्यानयोगभस्मरणान्नाशयेद्दिषंमिति । अनातंयालपाद्दकमलयः । पन्नगेन्द्रकुं
नाधिपः सपाणाद्दर्पणमयमिति । एवंसाधकेद्दःजुरसुष्टनसुलयनीतिमिरक्कसमाधकेहोज्यरसुष्टनसपाणाद्दपन्नाधिपश्चके

नोऽत्स्वान्तेनीनपनशशिप्रेरवानरमथीमिषण्णाषण्णामणुपाकेमजनोनधकुना ।
महापद्माद्द्यांमद्दिनमलमाधनमनसामकालःपद्मनाद्धोमिपरमाशाद्दश्री ।२१

नाधिपश्वेसाभिनंमिसेतुसंधपं । २० । नोद्दद्दिति । नद्दत्स्वेलानिपुत्स्वेवानद्दमन्नीधिर्पसध्यान्यानिपंसाक्षणमद्धमसिर
सोगभिन्नाः क्षणमण्डलेआलांवकृक्षणक्षणमानद्दीनान । एनबाआलांशनार्धक्षिरूपणावसरद्दगुमेवमुनिपाद्दनं । नपनशशिवरवानरम
थीमद्दर्पवंद्दनआभिकां । एनश्चभिद्दंलवरूपनिरूणावसरसम्पूः निरूपिनं । निषण्णाओसीलाषण्णाषद्दसल्याकानां । अपिः समुच्चये । नंदि
कयंसमुचिनानि । नंधिन्नपस्यापुपरिक्रमलानापमानाषद्वकोणा । कमलानांतुसहपश्चैर्मधनिरूपितं । नवम्बवसाः कलासहस्त्यावद
शीकठामहापद्माद्द्यांमहातिपमानिवद्दद्दिद्दस्यानिमहलमेघ्यानानिनुसषणद्दीनस्यावद्दमहदमेदनार्णिकामामिलर्षः । वहामहाप

शि० व०
२१९

धनं वितन्द्री धियो विशेषेण तन्द्री प्रमीला आलस्यं यस्याः सा निद्राणा इत्यर्थः। महेन्द्राणामियं माहेन्द्री वततुरीशानां मिन्द्राणां मनूनां संघः विततिरपि संमीलित
न दृशा तादृग्यस्याः सा संमीलितदृशा हन्ता इत्यपि तावित्यन्त इति द्वापायत्ता संमीलितदृशा करणेन वितन्द्री माहेन्द्री महासंहारे कल्पान्ते अ
स्मिन् विहरति उन्चूरवलन यावत्ते हे सति त्वत्पतिः सदाशिवः असौ सहस्रकमलेषु परिदृश्यमानः। अत्रेषु पदयोजना। विरिंचिः पंचत्वं व्र

।विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनं।
वितन्द्री माहेन्द्री विततिरपि संमीलितदृशा महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ।।२६।

जति हरिराप्नोति कीनाशो विनाशं भजते धनदो निधनं याति माहेन्द्री वितन्द्री विततिरपि संमीलितदृशा। वितन्द्री अस्मिन् महासंहारे हे सति त्वत्प
तिरसौ त्वत्पतिर्विहरति। अयं भावः। सर्वेषामधिकारपुरुषाणामीश्वराणां च संहारे ब्रह्माण्डसमये यं भंगसमये न केवलं विहर

20

जपइति।जपोमंत्रजपः।उच्चैरुपांशुमानसिकभेदेनत्रिविधोऽपिजपोजल्पः।प्राकृतिकसंलापः।शिल्पंसकलमपिहस्तविन्यासादिक्रियाविषयः
मुद्राविरचनामुद्राणांसंक्षोभद्रावणाकर्षवश्योन्मादमहांकुशाःखेचरीबीजयोनित्रिखंडामकाराविरचनान्निष्करणानि।ग
तिःप्रादक्षिण्यंक्रमणंप्रदक्षिणक्रियाअशनाद्याःआदिनाद्रियशक्तिविषयदार्थवर्णं।आहुतीनांहवनंहोमविधिः।प्रक्षेपाभिरामाणि
भिःकरणंप्रणामोनमस्कारः।संवेशःपारतंत्र्यकवंदनंजल्पशिल्पादिप्रयोजनेसंगमनयानोन्मीलननिमीलनादिकंवस्तु
स्वसुखकरंवस्तुअखिलंसमस्तंशब्दादिकमात्मार्पणदृशाआत्मार्पणबुद्ध्यासपर्यापर्यायःसपर्यापूजातस्याःपर्यायःरूपांतरंस

जपोजल्पःशिल्पंसकलमपिमुद्राविरचनंगतिःप्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामःसंवेशःसुखमखिलमात्मार्पणदृशासपर्यापर्यायस्तवभवतुयन्मेविलसितं॥२७॥

पर्यायस्यार्थः।तवभवतुभक्तानयन्त्रयसिद्धमेवविलसितंविलासःअत्रेत्थंपदयोजना।हेभगवतिमेआत्मार्पणदृशाआत्म
जपोजल्पःशिल्पंसकलमपिमुद्राविरचनागतिःप्रादक्षिण्यक्रमणमशनाद्याहुतिविधिःप्रणामःसंवेशःअखिलंसुखंच
विलसितंतवसपर्यापर्यायःभवतु।अयमर्थः।भगवतीनांअपादिरूपतायथार्थेकल्पितानयनोन्मीलननिमीलननिमेषो
न्मेषांगजंभणादीनांयथार्हंसपर्यापर्यायताप्राप्यादृक्सुखकरस्यवस्तुनःप्रादशोपचारमूलपादंदनंभद्रकलाभ्यासः
वतीकलानिधिःकुलानंदकुलशंभोराजेश्वरीनामरहितअर्हंस्वयंसंवरतितमतंबोधयितुंनिमित्तंशापकेनेवर्णितानांरहस्यनामपि

व्यतिरेकेणात्मार्पणबुध्या सागरत्वसपर्यापर्यायः न तु स्तोकमात्रं । यद्वा शरीराभिमानं यात् इङ्गितं सं देवेन सुखं यादृशीं येन न स्तुत्वं मत्वेवं
न कदाचित्तु सदाशिवायेत्यर्पणं सपर्यापर्यायः । अत्र इदमनुसंधेयं । समयिनां मते समयस्य सदाशिवतत्वस्य सपर्यापर्यायः सहस्र
कमलस्थत्वेन तु बाह्यपीठादौ यद्यपि समयिनां योगीश्वराः संसारयात्रामनुवर्तमानाः सदा सदाशिवतत्वमेवानुचिन्तयन्तः आत्मैकमेव
णावर्तन्ते तेषां पापोऽल्पश्च इत्यादि सपर्याप्रकाराणि रूपितानि । यन्तु समयिनां योगीश्वराः विजने गृहान्तरे वा वसेय वासनाहीनाः
निगृहीतेन्द्रियाः सदाशिवतत्वे ध्यानेन निष्ठाः वर्तन्ते तेषां वक्ष्यमाणचतुर्विधषड्विधध्यानानुसंधानमेव अङ्गवस्याः सपर्यात्मक

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत्क्ष्वेडं कवलितवतः कालकलना न शम्भोस्तन्मूलं तव जननि ताटङ्कमहिमा ॥ २८ ॥

भवति अत एव पक्षद्वये पि वा सपर्यायाः सक्रिया पञ्चतन्त्रे पादुकायां सल्लक्षणा शालीनि समयिनामिति रहस्यं । यत्तु तं इदं
न विद्यायामुक्तं मन्त्रमेतन्मध्यस्थाने हृदि श्रीत्रिपुरसुन्दरीं । पाशाङ्कुशधनुर्बाणान्धारयन्तीं प्रपूजयेत् हृदि निर्वाणसमाधिप्रकारक
थनं तु समयकौलिमतमिति पुरस्तात्प्रपञ्चयते ॥ २७ ॥ विरिञ्चिः पञ्चत्वमित्यादिश्लोकेन यदुक्तं तदेव सोपपत्तिकरमाह । सुधा
मिति । सुधाममृतमपि पिरिराधनं आस्वाद्य पीत्वा प्रतिभयजरामृत्युहारिणीं प्रतिभयौ जरामृत्यू भयंकरौ तौ जरामृत्यू तौ हरतीति
तिसात भोक्तॄणां विपद्यन्ते । विश्वे विधिशतमखाद्याः दिविषदः सुरगणाः । करालं यत् भयङ्करं यत्क्ष्वेडं विष

कवलितवतः कालकलना न शंभोस्तन्मूलं ताटंकयावकत्वे कालस्य नास्ति कालो ममेति किंतु निकथा नो नाटंकयावकत्वं काल
स्य नास्ति कालोत्पत्तिस्थितिलयानां नाटंकेषु निमित्तत्वादिति भावः। प्राप्तिश्च समर्थः मासु वीक्षितादिनी। २८। किरीट
मिति। किरीटं वैरिंचं विरिंचिसंबंधि परिहर पुरः अग्रे कैटभभिदः केटभस्यारेः अनुरिंद्रिनश्यीनिकेट
स्थितस्य विष्णोः कठोरे कोटीरे मुकुटे स्खलसि अपनयनं कुरु संभृत्या जहि समंजंभारिमुकुटं प्रणम्रेषु

किरीटं वैरिंचं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जंभारिमुकुटं।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ २९ ॥

वैणद्वंद्वं उपनतेषु एतेषु विधिविष्णुभिः आदिकैटभभिद्भूषु प्रसभं अतिशीघ्रं ससंभ्रममित्यर्थः। अस्यार्थं पद्ययोजना। हे भगवति पुर
वैरिंचिं किरीटं उपयातस्य समागतस्य भवनं मंदिरं भवस्य परमेश्वरस्य अभ्युत्थाने अभिमुखोत्थितौ तव परिजनोक्तिः सर्व
सर्वोत्कर्षेण वर्तते। अस्यार्थं पद्ययोजना। हे भगवति पुरः वैरिंचिं किरीटं परिहर कैटभभिदः कठोरे को
टीरे स्खलसि जहि जंभारिमुकुटं अहो इत्येवं रूपा एतेषु प्रणम्रेषु प्रसभं भवनं उपयातस्य भवस्य प्रसभं तवाभ्युत्थाने परिजनो
क्तिर्विजयते। अत्रोदात्तालंकारः। वस्तुवर्णनमुदात्तमिति लक्षणात्। २९। ॥ सांबशिवाय नमः ॥

९२

स्वमिति। स्वदेहोद्भूताभिः स्वस्य योदेहः तस्मादुद्भूताभिः। अत्र देहशब्दो देहावयववर्णं लक्षयति। घृणिभिः मयूखैः मयूखानां
वरणाद्वर्त्तनमुक्तं प्राक् अणिमाद्याभिः अणिमगरिमव्याप्तिभिः रश्मिभिः आवरणात्तेनावरुद्धनाडिर्भुक्तामितिशेषः।
निषेव्यसंसेव्यनित्याभिः त्रिपुरसुन्दर्यादिभिः नामनामरहितां अहमिति अहंभावनायां समस्तसर्वकालं भावयति ध्यानेकरोति
यः साधकः किमाश्चर्यं आश्चर्येनातितस्य साधकस्य त्रिनयनसमृद्धिं तृणयतिनयनाभिमतगाः प्रकाराः सूर्यस्य इङ्गनकरि
रूपायस्य दर्शनानि समस्तिनयनः इडापिङ्गलासुषुम्नामार्गाः त्रयाद्दर्शनेउपायाइति त्रिनयनः सदाशिवः शोणिनय

सुधाहाद्भूताभिर्घृणिभिरणिमाद्याभिरहं निषेव्यनित्याभिस्त्वामहमिति सदा भावयति यः।
किमाश्चर्यं तस्य त्रिभुवनसमृद्धिं तृणयतो महासंहर्ताग्निर्विरचयति नीराजनविधिं ॥३०॥

नातिश्चर्यं पि यस्य सः ब्रह्माद्विष्णुर्हृत्वादिना भवः। तस्य समृद्धिं तृणीयमानं ऐश्वर्यं तृणीकुर्वतः महासंहर्ताग्निः प्र
लयकालाग्निः विरचयति कृत्वा तिनीराजनविधिं नीराजनानुष्ठानं तस्य नीराजनक्रियामाचरति नः प्रलयकालाग्नि
रपि तस्य सर्वः। अत्रेदं पदयोजना। हे निषेव्ये नित्ये स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिः रश्मिनां नाडिर्नित्याभिः अभितः स
वलितां त्वां यः साधकः अहमिति सदा भावयति त्रिनयनसमृद्धिं तृणयतः तस्य महासंवर्ताग्निः। नीराजनविधि
विरचयति नीति किमाश्चर्यमिति। अग्नायजडवः। अहमिति भावनयातादात्म्यायासिद्धाभगवत्सायुज्यं नीराजनविधिं

ग.री.टी.

चतुरिति। चतुःषष्ट्यातन्त्रैः चतुःषष्टिसंख्याकैः महामायाशाबरादितन्त्रैः। अत्र चतुःषष्टिशब्दस्य संख्यापरत्वादेकवच
नान्तत्वं सकलं समस्तं अतिसंधाय अपि बाधयित्वा भुवनं प्रपञ्चं स्थितः नित्यव्यापारः तत्तत्सिद्धिप्रसवपरतन्त्रैः ता
२४ स्ताश्च सिद्धयः चतुःषष्ट्या तन्त्रेषु एकस्मिन्नेकस्मिन् प्रयुक्तेन मन्त्रेण एकैका सिद्धिरित्यर्थः तासां प्रसवे उत्पत्तिः तत्र
परतन्त्रैः। यद्वा तेषां तेषां सिद्धयः सन्ति इत्यर्थः चतुःषष्टितन्त्रेषु तेषां तेषां साधकानां साधिमताः सिद्धयः तासां तासां प्रस
वपरतन्त्रैः अन्यादृक्कर्मियत्नैः पशुपतिः (पशूनांसामितां पतिः) पश्यन्तीति पशवः इन्द्रियाण्यपश्य

चतुःषष्ट्या तन्त्रैः सकलमतिसंधाय भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटनास्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम्॥ ३१॥

नीति व्युत्पत्त्या पशवः तान् पाति रक्षति पशुपतिर्जीवः शिव एव जीव इति पशुपतिः शिवः। पुनः भूयः त्वन्निर्बन्धात् त्व
या निर्बन्धः चतुःषष्टितन्त्रप्रतिपादितः सर्वसिद्धान्तरूपं सकलपुरुषार्थसाधनं तन्त्रं मातरापदे शक्तीकार्यमन्या
दृश्यावस्थाकृता निर्बन्धः इति यावत्। पद्मालादिति स्थितं पदं पदं तस्मात्। अखिलपुरुषार्थैकघटनास्वतन्त्रं स्वयमेव प्रभा शिव.
तन्त्रं स्वतन्त्रं ते क्षितितलम्‍[illegible] इत्यादिना कर्मकेवलं इह बध्य २४

माणं। अथेत्थं पृष्टोऽसौ। हे भगवति पशुपतिः सकलंभुवनं तत्तत्सिद्धिप्रभवपरतंत्रैः अतिसंधायास्थितः पुनस्त्वन्नि-
र्बंधादखिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरत्। चतुःषष्टितंत्राणि चतुःशत्यां। चतुःषष्टितं-
त्राणि मालिकाण्युक्तमानि च। महामायाशांबरं च योगिनीजालशांबरं। तत्वशांबरकं च भैरवाष्टकमेव च। चंद्रज्ञानं मालि-
नीच महासंमोहनं तथा। महाजुष्टं वामदेवं वातूलं वातुलोत्तमं। हृद्भेदं तंत्रभेदं च गुह्यतंत्रं च कामिकं। कलावादं कलासारं त-
थान्यत्कुब्जिकामतं। मतोत्तरं च वीणाख्यं त्रोतलं त्रोतलोत्तरं। पंचामृतं रूपभेदं तंत्रं पंचकमेव च। सर्वज्ञानादिकं पंचभूतोड्डाम-
रमेव च। पूर्वपश्चिमदाक्षिण्यमुत्तरं च निरुत्तरं। विमलं विमलोउं च देवीमतमतः परं। एवं चतुःषष्टितंत्राणि। पार्वतीं प्रति
23
शंभुना प्रकीर्तितानि। एतानि तंत्राणि जगतामतिसंधानकारिणानि विनाशहेतुभूतानि वैदिकमार्गदूरवर्तित्वात्। अतएव
के भगवत्पादैः चतुःषष्ट्यातंत्रैः सकलमतिसंधायवद्भिः सकलविद्वल्लोकप्रतारकाणि इमानि चतुःषष्टितंत्राणि। तथाहि
महामायाशांबरतंत्रे मायाप्रपंचनिर्माणफलं। मायाप्रपंचनिर्माणं नाम सर्वेषां चक्षुरादीनामन्यथापदार्थग्रहणकरणं
यथा घटस्य पटाकारेण प्रतिभासाकरणं। योगिनीजालशांबरं। मायाप्राधान्यतंत्रं शांबरमित्युच्यते। तत्र तंत्रे योगिनीजालद-
र्शनं तद्वशमनादिकं मार्गेण साध्यते। तत्वशांबरं तत्वादीनां पृथिव्यादीनां शांबरं महेंद्रजालविद्यायथा। पृथिवीतत्वं उदकतत्व

सु.टी.पी.

२५

हिंऽऽ कृत्तेल्व पृथिवीतला॥ एवमन्योन्यं प्रतिभासयन्ते। अरत्नाष्टकं नाम सिद्धेश्वर ब्रह्म क्रमेश्वर वंकाल अरत्न शक्ति योगिनीसिद्धेश्वर प्रभाना
ष्टकं नन्नाणि निध्याये हि क्रमफल्ल साधनान्यपि कापालिकमतलोहे॥ ...पण्प्र्ष्टोन पामरत्नानां गुणाः अरत्नकं एतद्दपिवर्हिमार्गे इद्दं
मार्गेह्राणि। वज्रहृत्पाष्टकं शक्तिसमूहानि रूपाणि प्रासीमाहे॥ वरीकामारीवेष्टवीआराहीश्रणीवामुंडाशिवद्गती अष्टरूपाण्य
नलं यप्रवन्नानि नेत्राणि अष्टनेषामष्टानां गुणाः अष्टकं एतद्दपि वर्हिकमार्गे इद्दं रत्वानन्तं पंचमप्रतिकं अभिपापाः श्मशमगः वज्रह्रूपा
ष्टकं पूलाकुष्ठसमन्नातुप्रसन्नयान्तकेसिद्धोषः। यमलाष्टकं यमलजनाम सिद्धं वानन्ताधिपा कामिनं माणिनं माणिमाप्रश्लानिप्र
ष्टनेषां गणः यामलाष्टकं एतद्दपि वर्हिकमार्गेहूं। वंद्गास्तं वंद्गस्तानविधाया घोऽराणि स्यामति पाहूनं निस्ता प्रतिपाहकं लनकाप
लिकमतानां पालित्वाहूयमरउ पाहपंचहस्तानविपावत्तुःषष्टिनेमातीना मालिनीविधा समुद्रयानोपाय हेतुः सापि वर्हिकमार्ग
हूर्वर्तिनी। महामोहे ऽगमनामपि निद्राहेतुः सापि वाल्कृिष्टाहताहिकुमार्गेण साध्यानि विविद्धा। वामकुष्टसहाहवर्तनेवामार्ग
रक्कं कमिनिरपूर्ववान्नेऽं वातुलोन रं ऽ सिद्धेवनं मन्त्रपंकर्षणादिप्रतिष्ठापिनं विधिप्रतिपादिनं मलितं नेत्रयकर्षणादि प्रतिष्ठ
नाः विधयः एके शाप्रतिपादिताः सर्वे कह शास्त्रवर्हिकमार्गाः। अव्याशिष्टल्पं वर्हिकः। हह्हनेनं कापालिकमथपपपित्तंदं हतनेन
द्कमलऽऽ सहस्रकमलं प्रवेशात प्रतिपादिनान्तस्मिं तथापि नम्निमतं गेवामावाराः पतत्र रलिकापालिकमवनेन। नेमरहरतुषः
वेममाशनरहस्येन परहेमत्तत्राणा ऽह इलितदियात्तुषाने वद्गहिंसाप्रसक्तिः नंमहूपंचहमार्गीरंकलागहं नामकज्ञानां

रा.न.

२५

द्रष्टॄणां वादः। भूतिपादं नैयस्मिन्नर्थे नैतत्कथावादं वात्स्यायनादिकं यथापि कामपुरुषार्थं तेपि कुल्लग्रहणमोक्षदर्शनस्य
नस्थानग्रहणं द्रकुल्लारोहणाभिनो कामपुरुषार्थानुपयोगात्सारसत्त्वादिगमनान्निषिद्धा वारां पदशतान्येकदेशे निषि
ध्यांय पाँपि अनिषिद्धा ः कापालिकेन कुलिने भाषितन्नेयर्नेमानः पुरुषार्थाय कापालिको धर्मीति कापालिकत्वेन गणना
२५ नेत्र स्यकुलाचारो कुलाकर्षनिभो यत्र भवन्ति तत्कुलाचारो वामाचार स्यथा नंदी ऽकिंकापुडिकासिद्धिः सिद्धहेतुः सापि वामाचार
प्रधानत्वेव क्षेत्र मन्त्रोन स्नान वितुः षष्टिसहस्रसंख्याहनिइति। वीणाख्यवीणासंयोगयक्षिणीतिके निह। मोनरे गुडि
टिकांजन पादुकासिद्धिः गुटिका मनोनरे मनेवीणाख्यवीणायोगिनीसा सिध्यतीति वीणाख्यवीणासंयोगयक्षिणीति
कविनानोनले गुटिकांजनसिद्धिपादुकासिद्धिः। गुटिका पानपाने। मोनले मनेरेव वतुः षष्टिसहस्रसंख्याकम्। निर्णीनाद्व
र्शनां पंचामृतं पंचानां पृथिव्यादीनां पिंडं यत्र भरणाभावः भूतिपादिनः स्वस्वंवामृतनं तंत्रे कापालिकमते। रूपं ऽसाधिं पंचभूता
त्पंचकं मारणहेतुः स्मसवैदिका सर्ववेत्तानाद्धितंत्रे पंचकं कापालिक सिद्धांते कर्हशी हिंगावरमतमिति हर्तनएवं हयः। एवाभि
हर्शी मतपर्यंतं दिगंबरकर्हशिक्षपणकेमतमितिनलोपि हर्तनएवं हयं। वतुः षष्टिमंत्राणि परिज्ञातव्यानामपि वेंवकाभि।
तीहकमात्रसिद्धिपरत्वात्। वैदिकहरमार्गेपि परिज्ञानाराधिविहितत्वात् पंचयानप्रपंचना प्रमाणितात् एवंनिरहस्यं।

२६ ननु विप्रलिप्साद्याशयदोषरहितस्य भगवतः परमेश्वरस्य पशुपतेः कांश्चिन्प्रति वञ्चकत्वं कथमिति चेन्नैवम्। परमेश्वरः परमकारुणिको विप्रलि-
प्साद्याशयदोषाः न च न सन्त्येव किंतु परमेश्वरः पशुपतिः अत्यन्तवैदिकशूद्रज्ञानीयानधिकृत्य तन्त्राणि निर्मितवान् तत्र चतुःषष्टितन्त्राणि पातुं न त्र-
ैवर्णिकानां वक्ष्यमाणत्वधिकारः। शूद्रादीनां संकीर्णानां चतुःषष्टितन्त्रेष्वधिकारः एवमधिकारभेदमज्ञात्वा मीमांसकाः व्यामुह्यन्ति। तथा-
मेवाशयदोषान्पशुपतेः परमेश्वरस्य निर्णयः। चन्द्रकलाचतुष्कं श्रीविद्याप्रतिपादकं तन्त्रेषु चन्द्रकलाज्योत्स्नावतीकलानिधिः कुलार्णवकुलेश्व-
री भुवनेश्वरी बार्हस्पत्यं दुर्वासमतं चेति। तन्त्राष्टकेऽस्मिन् त्रैवर्णिकानां शूद्रादीनामधिकारोऽस्ति। तत्र ब्राह्मणादीनधिकृत्य समयमार्गेण ग्राह्यक्षिप-
न सर्वेषामनुष्ठानं चन्द्रकलाद्यैः प्रतिपादितः शूद्रादीनधिकृत्य अपसव्यमार्गेण वामाचारो निरूपितः। शुभागमपञ्चके वैदिकमार्गेणानुष्ठानं कलापरि-
रूपितः। अयं शुभागमपञ्चकनिरूपितमार्गो वसिष्ठसनकशुकसनन्दनसनत्कुमारैः पञ्चभिर्मुनिभिः प्रदर्शितः। अयमेव समयाचार इति व्यव-
ह्रियते। तथैवास्माभिरपि शुभागमपञ्चकानुसारेण समयमतमवलम्ब्य भगवत्पादप्रणीतमनुसृत्य व्याख्यातं तेन। चन्द्रकलाविद्याष्टकं कु-
लसमयानुसारित्वेन मिश्रमित्युच्यते विद्वद्भिः। चतुःषष्टितन्त्राणि कुलमार्गस्य। मिश्रकं कुलमार्गं परित्यज्य शाङ्करीति। कौलं च सम-
न्वयं लभ्यत इति कौलमार्गे कौलमतं कर्मणि प्रवृत्तम्। अतश्च शुभागमपञ्चके षोडशनित्यानां प्रतिपादनं मूलविद्यायामन्तर्भावमर्गीति
सम्यगत्यार्चके विद्यायामन्तर्भावान्नोक्तम्। अतएव चतुःषष्टिविद्यायामन्तर्भूता चन्द्रकलाविद्या षोडशनित्या- टी॰
स्या प्राधान्येन प्रतिपादिता इति न चक्षुः कौलमार्गः। अयं तु समयमार्ग इति रहस्यम्। अत्र इदमनुसन्धेयम्। शुभागमपञ्च- २६

नामवसिष्ठसंहितासनकसंहितासनंदनसंहितासनत्कुमारसंहिताशुकसंहितापंचैतिपंचसंहिताः शुभागमपंचकं तन्मते व
सिष्ठसंहितायां देवीप्रति ईश्वरवचनं शक्तिचोदितायथा। शृणु देवि प्रवक्ष्यामि नित्याषोडशकं वरं। नकस्याचिन्मयाख्यातं स
र्वतंत्रेषु गोपितं। तत्राद्यां प्रथमां नित्यां महात्रिपुरसुंदरी। ततः कामेश्वरी नित्या भगमालिनी। नित्यक्लिन्ना तथा भे
रुंडा वह्निवासिनी। महाविद्येश्वरी दूती त्वरिता कुलसुंदरी। नित्या नीलपताका च विजया सर्वमंगला। ज्वालामालिनि
चित्रा एता नित्याःस्तु षोडश। प्रतिपत्प्रभृतिपौर्णमास्यंतमर्चयेत्। एकादिवृद्ध्या सहत्या च दर्शने तिथिनियमं। एतच्च षोड
शनित्या षोडशनित्यात्मकत्वेन रहस्येन निरूप्यते। इह तासां षोडशनित्यानां श्रीचक्रे अंगतयांतर्भावं निरूप्यते। षोडशा
शनित्यास्तु अष्टवर्गात्मकत्वात् अष्टदलपद्म अष्टदलपद्मे पूजिताः। यथाक्रमेण मध्यकोणचक्रे प्रागादिकोणमारभ्य एकैक
स्मिन्कोणे द्वे द्वे क्रमेणांतर्भूते। एवमष्टदिक्षु नित्या अष्टकोणचक्रेंतर्भूतानि। एता एवं नित्याः षोडशस्वरात्मतया षोडशदलपद्मे स्थि
ताः द्विदशारेंतर्भूताः एतासां नित्यानां मध्ये प्रथमां नित्यां दर्पणत्रिकोणबिंदुरूपेण स्थितेन। अवशिष्टास्तु चतुर्दश नित्या मन्वस्रांतर्भू
ताः। मलक्षाग्निनैमध्यपुरत्रयपंचदशत्रिकोणयोरंतर्भूताः। एवं चक्रेंतर्भावः। नित्यानामिममंतर्भावं मूरुप्रस्तारयारुः। एते
एवं चंद्रकलाविद्यायाः चक्रे विद्यायाः अंगत्वं नित्यानामिह। सनंदनसंहितायां महर्षीन्प्रति सनंदनवचनं। एतास्तु षोडशनित्या
स्वात्मिकाः पंचदशाक्षरात्मेन गतत्वगादिमहत्तत्वसाभिसर्गात्मकसकाराभ्यां संगृहीताः। श्रीचक्रेऽधरूपाः चैतद्वक्तनस्य

ा.टी.

पिताः तत्रैव महाहृद्यामावसानाः पराशंकुशबीजस्युक्ता अघोरेश्वरकोणहृदयेबीजं नभ्रमाभुवनेशी च स्तु मकारादयो वर्णा मन्त्रेस्मिन्
तावस्मान्तु ईश्वरकोणेषु चतुर्दशांतं नभ्रेताः शिवेवर्णचतुष्टये शिवचक्रे तत्तु एयं नभ्रेत इयमेव चक्रे जासप्रस्तारमाहुः। एवं निर्म
नां चक्राविर्भावगत्वमुक्तं। सम्बन्धेनाभ्यसिता मामपि षोडशाभिस्थानांचक्रे विधायामंगलेषु शक्तिपादिमाय भास्करकुमारवर्ण
न श्रीचक्रस्यागमनाभिमानवशिन्याद्या ऊर्ध्वकोदण्डकेमेरु मित्रावेदवर्गि वर्णं विलयअष्टकोणषु नभ्रेताः मध्ये त्रिपुरसु
न्दरी अंतर्वायावशीन्यष्टकं यामिनीखण्डशक्तेः शारयुग्मानन्तरं अष्टवर्गाः अष्टवशिन्याद्याः षोडशनित्याद्याः त्रयमिन्म

रवि:शशि न शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरमः।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजन्ते वर्णास्ते तव जननि नामावयवतां ॥३२॥

तनस्मा गंधाकर्षिण्यादयः एवं चतुश्चत्वारिंशत्तत्त्वकाराः किंचित्सा यत्र यस्मात्तारिंशत्कोणेषु अयश्चत्वारिंशद्देवताः अंतर्भू
ताः एकां त्रिपुरसुन्दरीं देवीं स्थानाद्धस्तात् गंधाकर्षिण्यादयो रत्नप्रिक्षिति निसाना मंशात्मप्रतिपादितं इयमेव भूप्रस्तार
माहुः। अष्टानां वशिन्याद्यानां द्वादशयामिनीनां गंधाकर्षिण्यादीनां नामानि सविभक्तिकानि स्थूलकच्यारन्यानावसरेस्मिन्
प्रादितानि। ३१। शिव इति। शिवः ककारः शक्तिः एकारः कामः ईकारः क्षितिः लकारः अथ शब्दावसानद्योतकः। रविः हकारः शीत
किरणः सकारः स्मरः ककारः हंसो हकारः शक्रो लकारः तदनु च सवसान भागे परा मारहराः सकारः ककारः ह्रीं लकारः अमी ह्रीं वर्णा

शिव.
२७

हस्लेसाभिः क्रींकारत्रिसप्तिः त्रिवलिशिरैः अवसाने पुनिरामस्तोनेपुवनुष्कपंचकोत्रिकाणामुपरिघटिताः योजिताः ॐ अं ते प्रामुवं निवर्णाः पूर्वी
क्ताः ककारादयः नवरूवत्वाः ॐ न शिहमानः नामावयवतां नाम्नाः त्रिपुरसुंदरीमंत्रस्य अवयवता। घनीकृते। अत्रेयं पदयोऽनाहं अनेन्ति
शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणस्मरो हंसः शक्रस्तदनु च परामारहरा। पंच इत्यमी वर्णाः निस्रक्षि हस्लेसाभिः अवसाने पु
घटिताः ते वर्णाः तव नामावयवताः ॐ न। अत्रेदमनुसंधेयं। शिवः शक्तिः कामः क्षितिरिति वर्णचतुष्टयं मान्नेयखंडं। रविः शीतकि
रणः स्मरो हंसः शक्रः इति वर्णपंचकं सौरखंडं। ॐ इयामध्ये हर्इ। स्वाधिष्ठानीयं हस्लेसावीं ॐ। परामारहरयः इति वर्णत्र
यं सौम्यखंडं। सौरसौम्यखंड इयामध्ये अग्निग्रंथिस्थानीयं हस्लेसावीं ॐ सौम्यखंडप्रथमाणवं इकलाखंड इयामध्ये ब्रह्मग्रंथिस्था
नीयं हस्लेसावीं ॐ। वं इकलाखंडं तुरीयपदशाहृद्गगनमसिलितमप्रकाशितं। अतएव त्रिखंडमातृकामंत्रः सोमसूर्यानलात्मकः इति
आरोहणक्रमेणेति शेषः। सोमसूर्यानलात्मक इत्येतावन्मात्रं वक्तव्ये त्रिखंड इत्युक्तिः ज्ञानशक्तिः इच्छाशक्तिः क्रियाशक्त्यात्मकखंडत्र
यमिलितजाग्रत्स्वप्नसुषुप्त्यवस्थात्मकं विश्वं तेऽसमाहरतीति त्रयात्मकं तमोरजःसत्वगुणात्मकमित्येवं। एतत्पुरस्तात्पंचविद्याम
अतः शिवः शक्तिरित्यादिशब्दाः क्वचिल्लक्षणया ककारादिवर्णपराः। तथाहि त्रिपुरसुंदरीमंत्रस्य षोडशवर्णाः षोडशनित्यात्मन
यास्थिताः अत्र षोडश्याः कलायाः नित्यत्वमप्रदेशाद्वं इकलासापमास्यात्मावकलाविहीकरमानस्याः छायाविरहिद्वते षोडशा
रकलात्मनयात्मत्वतीति रहस्यं। [illegible] नमाः। एकावर्णाः षोडशकलात्मकः प्रकृतिभूतः इति। यद्यपि षोडश

कल्पगुरुमुखमुखादवगंतव्याध्यस्याः अभिनिपादनं व्याख्यानं सापेक्षमेव अनेनानुपादयंस्यादिति साकल्पनिरूपणेन । न च शाग्रेस द्भिः
मापेदेष्ट्यागुरुभक्तायसाकल्पेति । शिष्याणामेवापदेष्ट्यानान्यथामिति । यत्नु मदीयं ग्रंथं दृष्ट्वानो कलं ज्ञानं लिने मद्भि
ष्याएवस्यस्माकमनुग्रहः । ननु पादेवदेन पाशेपसंग्रहणहस्तमस्तकसंयागादिसकलापस्तुशिष्यस्यापादकस्याभावकं
थं तत्र शिष्यत्वमिति चेन्न । सत्यं यत्नु मदीयं ग्रंथं दृष्ट्वा षोडशधा तत्व पंगुर्व तन्तु त्वाद्व ज्ञानं लिनं धां भावस्तु शिष्यत्वं । यत्तु ज्ञा
नं लिन षामुपदेशान संभाष्य एवं तत्वज्ञानीं गुर्वेकपर

षोडशनित्याविद्यानां प्रकृतिभूतानां ककारादयः । ताः षोडशनित्याः शुक्लपक्षप्रतिपदमारभ्य अमावास्यान्ततिथिरूपाः एता एव चंद्रकलाभिधानाः
चंद्रकला एव प्रतिपदादितिथय इति सुप्रसिद्धं । यथोक्तं ज्योतिःशास्त्रे ॥ प्रतिपन्नाम विज्ञेया चंद्रस्य प्रथमा कला । द्वितीयाद्या द्वितीयाद्याः पक्षयोः
शुक्लपक्षयोः । अयमर्थः । चंद्रस्य प्रथमा कला याः प्रतिपन्नामधेया सा कलात्मिका सूर्यमंडलान्निर्गता कृष्णपक्षे तु सूर्यमंडलं प्रविशति शु
क्लपक्षे तु चंद्रमंडलान्निर्गता द्वितीया कला द्वितीयातिथिः कृष्णपक्षे तु सूर्यमंडलं प्रविष्टा द्वितीया कला द्वितीयातिथिरित्येवं सर्वत्रोहनीयान
तश्च पंचदशकलाव्यवधाने सूर्यचंद्रयोः पौर्णमासी पंचदश्यां कलायां सूर्यचंद्रयोरत्यन्तसंयोगः सामावास्येति विज्ञेया । अतः कालमने चंद्रकला
त्मिकानां षोडशानां कलानां नित्यानां प्रतिपदादितिथिभिन्न एकस्या एवानुष्ठानेन सर्वासां । समयतः षोडश्याः कलायाः स्तु पंचदशापि तिथिष्व
नुष्ठानं सिद्धं पंचदशानां नित्यानां तत्रैवानन्तर्भावात् । अयमस्य पःक्रमः सम्यगुक्तोऽपि दुर्विज्ञेयः इति स्पष्टार्थं पुनरुच्यते । प्रतिपदादि त्रिपुरसुंद
27 री कला द्वितीयायां कामेश्वरी कला तृतीयायां भगमालिनी कला चतुर्थ्यां नित्यक्लिन्ना नाम कला पंचम्यां भेरुंडाख्या कला षष्ठ्यां वह्निवासि
नी कला सप्तम्यां तु माहेश्वरी नाम कला अष्टम्यां रौद्री कला नवम्यां ज्वालिन्यालङ्किता कला दशम्यां कुलसुंदरी कला एकादश्यां नीलपताकाख्या कला
द्वादश्यां विजयाख्या कला त्रयोदश्यां सर्वमंगलाख्या कला चतुर्दश्यां ज्वालाख्या कला पंचदश्यां मालिन्याख्या कला सर्वासु तिथिषु चिद्रूपाख्या कला ष
ोडशी उपास्या प्रतिपदादिषु त्रिपुरसुंदरी कथिता सा चिद्रूपात्मिका न भवति चिद्रूपात्मिका न भवति चिद्रूपात्मिकायाः मूलविद्यायाः भिन्नत्वेनानु
ष्ठानात् तमंत्रोद्धारत्वनमत्रः प्रतिपद्येवानुष्ठेया न द्वितीयायामिति त्रिपुरसुंदरीक नित्यायाः नामसाम्यमित्युक्तं गनेभ्यो । एतासां षोडशनित्यानां
चंद्रकलात्मिकानां विशुद्धिचक्रे षोडशारस्थानेनत्रैव भागादिक्रमेण षोडशनित्यायाः तत्तत्कोणेषु परिवर्तनेन दधत्स्थिता द्वादशारे संविकल

लं द्वादशमंडलानि यद्दक्षिणक्रमेण परिवर्तन्ते तेषां द्वादशानां सूर्याणां द्वादशमासेष्वधिकारः। एतच्च सनत्कुमारसंहितायां स्फोटकमप्रस्तावानिरू
पितं तत्तु संक्षेपेणोच्यते। सूर्यचंद्रयोः देवयानपितृयानाख्ये इति उपिंगलनाड्यौ मार्गौ ताभ्यामेतयोः संसरणं चंद्रस्तु वामनाडीमार्गेण सं
चरन् द्विसप्ततिसहस्रनाडीमार्गमभितर्पयति सिंचति सूर्यस्तु दक्षिणमार्गेण संचरंस्तदुष्मानं अमृतबिंदुं पाहरति यदा चंद्रसूर्ययोः
रन्ध्रयोर्मूलाधारचक्रसमावेशस्तदामावास्या तिथिः कृष्णपक्षः पक्षतिथयः पतनं उत्पतनं। अनन्तरं कुंडलिनीशक्तिः आधारकुंडसूर्यकिरणस्
पर्शविलीनचंद्रमंडलसंभ्रमेण पुगतस्या पूर्वपरिपूर्तिं तस्य पिनस्थापावस्थे वक्रस्वपक्ष इत्युच्यते। योगी यद्यसमाहितचित्तः चंद्रस्थानस्
र्यं सूर्यस्थानं चंद्रवायुनानिरोधं समनन्तरं सूर्ययोनि कृत्वा अमृतं संवनं तद्ग्रहणाय रश्मीनासनी वायुप्रज्वालितस्वाधिष्ठानवह्नि
नाशुष्कीभूतं च मनं कुंडलिनी आहारा कुंडलिनी सुप्ताभिभूतासती सर्वतः फूत्कारं कुर्वती गंथिं निर्भिद्य सहस्रकमलमध्यवर्तिचंद्रमंडले दशति
तस्मात्ताल्ल्पीयूषधारा आप्लावनात्पदपरिस्थितं चंद्रमंडलं पावयन्ति नेतदनन्तरं मार्गं गलितान्निमूलाधारात् सर्वेदहानाप्लावयन्ति आ
प्लावकापरिस्थितस्य चंद्रमसः कलाः पंचदशानि साल्पिकाः पंचदशातदधःस्थितं विशुद्धचक्रमाप्रियपरिवर्तनात्सहस्रकमलस्थित
चंद्रमंडले वेदवस्थानं तत्कलाविभ्रमयोः आनंदः। शुक्लपक्षालिनिर्गीयते। सर्वत्रिपुरसुंदरी एव शुक्लपक्ष इति रहस्यम्। सर्वाः शुक्लपक्षति
थयः पौर्णमासीसंज्ञकाः। कृष्णपक्षतिथयस्त्वमावास्यायामन्तर्भवन्ति सामावास्या कृष्णपक्ष इति हि गीयते। अनेन वायोधिष्ठानं रस्थानं
मधनाभिसंस्वाधिष्ठानं तु सूर्यकिरणसंपर्कात् मिश्रकालाकः मणिपूरस्तु अग्निस्थानं पितृ सूर्यकिरणव्याप्तिदिवा मिश्रकालएव
लोकः। अनाहतं ज्योतिर्लोकः। एवमनाहतचक्रपर्यंतं ज्योतिर्लोकाभिमानं तमालोकः विशुद्धिचक्रं चंद्रलोकः आज्ञाचक्रं तु चंद्रस्थानत्वात्सुधालोकः

अनयालौकिक्याः सूर्यकिरणसंपर्केन स्यन्दमानासिद्धौ नालिसहस्रकमलान्तर्ज्योत्स्नामयश्चन्द्रलोकः तन्नष्टिनन्वेशनिस्सकलयायुक्तचन्द्रबिंबश्री
चक्रसमष्ट्यभ्यन्तरवर्तित्रिकोणमाधारचक्रं अग्निकोणं स्वाधिष्ठानं दशारं मणिपूरं द्वितीयदशारमनाहतं चतुर्दशारं विशुद्धिरिति चक्रचतुष्टयपूर्णमा
ज्ञाचक्रं बिंदुस्थानं चतुरस्रसहस्रकमलमिति सिद्धं आज्ञाचक्रगतचन्द्रपञ्चदशकलाः षोडशी कलायाः ध्वनिफलेन श्रीचक्ररूपचन्द्रबिंबरेखेन
सा परमाकलाप्रमीलिता षोडशकलाः यथा षोडशांशः कलाम्नानादिर्द्वादशदशानेत्र। सा पञ्चाशत्कलामयामातृकाचक्ररूपिणीति। एताः पञ्चाशत्क
लाः पञ्चाशद्वर्णात्मिकाः पञ्चदशाक्षरीमन्त्रभूताः यथाऽऽदिसनककारेणाऽऽलिपालकारः प्रत्याहृतः तन्मध्यवर्तिनां वर्णानामाहरः अयमेव लकारः प्र
कारपूर्ववर्ती अकारेण प्रत्याहृतः पञ्चाशद्वर्ण्याहकः। तच्च तन्न प्रत्याहारग्रहणं न पञ्चाशद्वर्णात्मकमातृकासंग्रहणं किमर्थं ककारलकारयोः प्र
त्याहारग्रहणप्रयासः। उच्यते। ककारो हलकाराणां ककाराः शब्दवाच्यत्वं गतं व्यञ्जनान्स्वरास्तत्संगत्वात्। कलानां स्वराणां प्रधानत्वमिति गु
णप्रधानत्वप्रदर्शनार्थं प्रत्याहारद्वयाश्रयणं कृतं सनकादिभिरिति ध्येयं। चलानुस्वारः बिंदुलक्षणकोनं बिंदुनादप्रतिपाद्यमानानां
दः संग्रहणं। एवं नादबिंदुकलात्मकं श्रीचक्रं त्रिखण्डमिति कथितं सम्यक्कलाश्रीविद्यापरपर्यायानादबिंदुकलातीताः एताः षोडशनि
त्यास्वतन्त्रैर्नाः। तथा च षोडशस्वराः ककारादयस्तानाः। षोडशप्रकारादयः सानाः षोडशनित्यकं षोडशनित्यास्वतन्त्रैर्नाः। हकारः आकाशबीज
वदूपं चाकाशलीनं लकारः अनस्थास्वतन्त्रैर्नाः ककारेण प्रत्याहारार्थं पुनर्गृहीतः। क्षकारस्तु षकारककारसंयुक्तप्रत्ययप्रत्वात्। ककारादयः सा
नाः षोडशनित्यास्वतन्त्रैर्नाः स्वराः साहिताः अकारेण प्रत्याहृतः क्षकारः अक्षमालानिर्गीयते। तयोर्यारभ्यारक्षरमिति व्युत्पत्तिर्यते। अतएव तु
भरसंज्ञा वर्णानां अतः क्षकारेण सर्वमातृकासंग्रहीता भवति। अतएवाग्निमखंडेन सकलहोमिति ककारलकारयोर्योगकलानि ध्यानिः। एवं
मन्त्रे सर्वमातृकासंग्रहीता भवति। अथ षोडशनित्यानामन्त्रगतषोडशवर्णानित्यावर्णात्मकं षोडशवर्णानां पञ्चाशद्वर्णात्मकत्वं पञ्चाशद्वर्णान्

सूर्यचंद्राग्निरूपणत्रिखंडत्वं मिलित्वैतस्य वस्तुत्रयमनुसंधेयं । एवं चक्रमंत्रयोरपि यथा ह्रींकारत्रयं मंत्रयंत्रशोभी अंशे शिवचक्रं चतुरश्रात्मकं त्रिको
णबिंदुरूपेणान्तर्भूतं सकलं त्रिवर्णत्रयेण संगृहीतं कलात्मिका मातृका अक्षमालात्मिका अक्षरात्मिका च मातृका उभयमपि यथायोगं चक्रे
न्तर्भूतं । तथा हि । अन्तस्थाश्चत्वारः ऊष्माणश्चत्वारः एवमष्टौ वर्णाः अष्टकोणात्मकाः वर्गपंचमान्तु अनुस्वाररूपबिंदावन्तर्भूताः । अनुस्वा
विसर्गयोरप्यत्र बिंदावन्तर्भाव इति मंत्रयंत्रयोरैक्यसुगमा हृदयमनाः उसाराणां कथितं । पूर्णोदयमनानुसारेण तत्त्वसामरस्यानन्दात्मकेन यान्त्रस्य
त्रिखंडत्वं । एवं मंत्रस्यापि त्रिखंडत्वं सुप्रसिद्धं । एतस्याः कलाः षोडश । द्वितीये खंडे त्वन्तर्भूताः । तस्याद्य खंडः ईकारात्मकेन भेदेन । अनन्तरं विंशतिकलाः अ
नुसंधेन भूताः । एवं मान्त्या दशकलाः आग्नेयखंडे भूताः । चन्द्रखंडे च त्र्यं आग्नेयखंडे तदेव नित्यकलायन्त्र...णामसंख्यमनुसंधेयं । सुधु
गादयस्तास्या नित्यानामस्वरूपमुक्तं । दर्शान्ताः पौर्णिमान्ताश्च नित्याः पंचदश वस्तु । षोडशी तु कलातिथ्यात्मिकान्ता चिद्रूपिणी । अस्यार्थः । दर्शान्ताः पौर्णि
मान्ताश्च तिथयः चंद्रकलाः । दर्शो नाम अमावास्यानन्दोपिनी प्रतिपत्कलानन्दाः ईषद्दर्शनाद्दर्शा आद्यास्तिथयो नित्याः पूर्णिमान्ता यासां ताः । दर्शा
दृष्टा दर्शना विश्वरूपा सुदर्शना । आप्यायमाना प्यायमाना प्याय । नन्दनंतरा । आपूर्यमाणा पूर्यमाणा पूरयंती पूर्णा पौर्णमासी । एतानि नामधेया
नि शुक्लतिथीनां दिनानि संगृहीतानि । दर्शाद्याः पूर्णिमान्ताः इत्यनेन एतासां नित्यद्वयं पूर्णे । दर्शादीनां पंचदशानां कलानां यथाक्रमं त्रिपुरसुन्दरीप्रभृतयः
पंचदश नित्या अधिदेवताः । षोडश्याः चिद्रूपात्मिकायाः सच्चिदानन्दरूपत्वात् अधिदेवतान्तरनामिस्वयमेव सर्वस्याधिदेवतात्वं यं । एतासामभिधा
नानि एतासामधिदेवता कामेश्वर्येकैव । अधिष्ठानदेवता कामेश्वरी एकैव अनन्तेन भेदेन विधा यामा नपंचदशा वर्णानां दर्शादयः कलाः नित्याः
कलाश्च विग्रहान्तरमिति ध्येयं । अतएव दर्शादिकलानां त्रिखंडत्वं स्पष्टं । दर्शा दृष्टा विश्वरूपा दर्शना सुदर्शना । अयमाग्नेयखंडः । आप्यायमा
ना प्यायमाना प्याय । नन्दनंतरा । अयं सौरखंडः । आपूर्यमाणा पूर्यमाणा पूरयंती पूर्णा पौर्णमासी । अयं चंद्रखंडः । तृतीया निरूपितः । एतासां कला

29

सांकृडानां नित्यात्वेनैक्यं संपाद्यं प्रतिपन्नदाङुपासनानमस्कारः दर्शमिव दिङ्मात्रेणाह्वाहतः। दर्शा कला शिवतत्त्वात्मिका। दृष्टा कला शक्तितत्त्वा
त्मिका। दर्शना कला मायातत्त्वात्मिका। विश्वरूपा कला शुद्धविद्यातत्त्वात्मिका। सुदर्शना कला अनलतत्त्वात्मिकाः। पंचतत्त्वात्मकमाग्नेयखंडमि
ति। अग्निस्तत्राधिदेवता। कामदेवः सर्वत्राधिदेवता कामेश्वरी सर्वत्राधिष्ठानमुक्तं। आप्यायमाना कला नउस्तत्त्वात्मिका। आप्यायमाना वा
युतत्त्वात्मिका। आप्यायमाना मनस्तत्त्वात्मिका। इन्दनाराा पृथिवीतत्त्वात्मिका। इराआकाशतत्त्वात्मिका। आपूर्यमाणा कला विद्यातत्त्वात्मि
का। एवं सोरखंडोऽद्वितीयः। तत्र सूर्योऽधिदेवता कामदेवः सर्वत्राधिदेवता कामेश्वरी सर्वस्याधिष्ठात्री। आपूर्यमाणायाः कलायाः चंद्र
खंडेनस्थितायाः सोरखंडेन संभवः। इडा कला अदेवतानां। इडा पूर्यमाणयारेक्यमित्यनुसंधेयं। पूर्यमाणा कला माहेश्वरीतत्त्वात्मिका। इरं
यंती परातत्त्वात्मिका। पूर्णा कला महेशतत्त्वात्मिका। पौर्णमासी सदाशिवतत्त्वात्मिका। एतास्तु विशुद्धचक्रे षोडशादिक्रमेण षागादिक्र
मेण षोडशदिक्षु परिभ्रमंति। तास्तु आज्ञाचक्रापरिस्थितेन चंद्रमंडलस्य षोडशकलाऽऽ इति सुष्ठु गाहृयप्रपंचितं। ननु पंचदशकलानां म
व षोडशारपरिभ्रमणं। षोडश्याः कलायाः सहस्रकमलेऽ एवावस्थानेन तत्रस्थितायाः नित्यायाः निसंध्यया कथ्यते। तथा तत्र संकेतिते
नः ककारात्लक्ष्यते। एवं शक्तिशब्देन शक्तितत्त्वात्मिकया दृष्टया कलया एकारो लक्ष्यते। काम इत्यनेन कामदेवतया दर्शनकलया ईकारो।

लक्ष्यते। क्षितिरित्यनेन ककाराल्लक्ष्यते न लमिति शास्त्रान्तरप्रसिध्या लकारो लक्ष्यते। रविरित्यनेन सूर्य्यस्वंडात्मतयाक्षरि हकाराल्लक्ष्यते। शीतकिरण
शब्दः सकारः वं इंदुबीजमिति शास्त्रान्तरप्रसिध्या शीतकिरणशब्देन सकारो लक्ष्यते। स्मरशब्देन कामराजप्रकृतिभूतः ककारो लक्ष्यते। हंसः सूर्यो
हकाराधिपतिरित्युक्तं प्राक्। शक्रः इंद्रः लकारः इंद्रबीजमिति शास्त्रान्तरप्रसिद्धः। शक्रशब्देन ककारो लक्ष्यते। परानंदकन्देनेंदुबीजं सकारो
लक्ष्यते। मारबीजं कामराजबीजमिति तत्प्रकृतिभूतः ककारो लक्ष्यते। हरिरिंद्रः। तेन लकारो लक्ष्यते। एवं मंत्रगतवर्णानां शिवादिपदानि
कतिचिल्लक्षणया प्रतिपादितानीति ध्येयं। एवं पंचदशनित्यायाः समुदायात्मकस्य मंत्रस्य पंचदशतिथिष्वनुष्ठानं विहितं पृथक्। नित्यानुष्ठा
नं तु प्रतिदिनं पृथक् नियतमनन्त्यतिरहस्यं तदुरुसुरसाद्भावगंतव्यमपि शिष्यानुग्रहाय कथितमिति सर्वमनवद्यं। ३२। श्रीः

स्मरमिति। स्मरं कामराजं योनिं भुवनेश्वरीं लक्ष्मीं श्रीबीजं त्रितयमिदं आदौ तव मनोर्मन्त्रस्यादिभागे पञ्चमोऽम्ब एके हि रक्ताः
समयिनः नित्ये आद्यन्तरहिते निरवधिमहाभोगरसिकाः अपरिछिन्ननित्यानुभवशाः परमा वै योगीश्वराः इति यावत् त्वां भजन्ति सेवन्ते त्वां कस्मी
सहस्रकमलान्तर्गते राकाशतकमठसंस्थापनादिभेषाः चिन्तामणिगुणनिबद्धाक्षवलय चिन्तामणीनां गुणाः आम्नायैः समूह इति यावत् तेन
निबद्धा रचिताः अक्षवलयः अक्षमालिका येषां ते। यद्वा चिन्तामणय एव गुणनिबद्धाः अक्षरचिताः पद्मबीजानि तेषां वलयाः मालिका
येषां ते तथोक्ताः। शिवाग्नौ शिवा शक्तिः त्रिकोणमिति यावत्। तद्रूप एव अग्निः त्रिकोणवह्निस्थाने स्वाधिष्ठाने निमग्नं ऋद्ध्यन्तरा भिष्यप

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोर्निधायैके नित्ये निरवधिमहाभोगरसिकाः।
भजन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः॥३३॥

३०

शांकुशाभ्यां सनिष्यभुवनेश्वर्या बगुह्ययन्त्रलीनकमाहि षाड्शसंस्काराः अर्थेन पञ्चसाशिवाग्निरिति रहस्यं। अयमाशयः। त्रिकोणवे
हवस्थाने स्वाधिष्ठानाग्निनिक्षिप्यति। यद्यपि वह्निस्थाने वर्तुलकोणं तथापि पुरश्चरणक्रियायां संविकमेव त्रिकोणमारोप्य सहस्रकम
लादिहृस्थाने कामेश्वरीमवरोप्य पुरश्चरणक्रियाकार्यमिति समयमनरहस्यमित्याचार्याणामयमाशयः। जुह्वन्तः सुरभि
घृतधाराहुतिशतैः। सुरभिः कामधेनुस्तस्याः विनिःसृतघृतमाज्यं तस्य धाराभिः आहुतयाहविः प्रक्षेपाः तासां शतानि सहस्राणि। अनेन प्रकारेणा
ऽनित्ये तव मनोरादौ स्मरं योनिं लक्ष्मीं इदं त्रयमपि निधाय निरवधिमहाभोगरसिकाः एके चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ सुर

शि० टी०

३२ स्थूलधाराकृतिश्लेषः शुद्धोऽप्यनुत्तरः। अनेकेन तत्त्वं समस्तिनां संग्रहस्य पुरश्चरणं नास्ति रूपापि नास्ति वाच्यकूटं नास्ति वाच्य कूटमपि
भयानसंत्यज्य कमलस्य सर्वं यागहृत्पुष्पं। एतद्रूपाकल्पिता साक्षात्कृत्याख्यानेनिरूपितं। कथितं शिवं तु स्वात्मा
ज्ञानस्य स्थितिः सा प्रोक्ता ख्यातावसरेऽपि पूर्णतरं पुष्पाद्यैर्याम इति। २१। नवात्मा स्थितिः सा प्रोक्ता परं शान्तं शिवं
मतं तद्रूपयोगिनः प्रतिरूपयोगिनां भवति स्वचित्। एवं सुन्दरं निर्विकल्पं अनुत्तरं पदम्। ततो रामि ते। १।१।१ सर्वं हृदयं
वलीमहाश्चर्यो रसो शंभोः आनन्दहृदेश्वरस्य। १।११। विस्मयो योगभूमिकाः ह्रदयं मिहिरा स्वरूपः स्वातन्त्र्यशक्ति मानयोगं

१।१२। स्वं शंभोः १।१२। विस्मयो योगभूमिकानवमानमन्त्रगर्वनिर्वाणानन्दमयं।
अतः शेषशक्तीषु स्वरूपमपि साधारणतया स्थितः संबन्धात्समरणे परानन्दपरमः। २८।

अस्य तत्त्वमवबुद्धिः साक्षात्कारः आत्मानं मन्येऽगनाभि लग्नलिङ्गः अस्या लीनलिङ्गाविनस्य संवृद्धिः हृदयलिङ्गम्
निर्विकल्पे नाशे च भूतानामागमलिङ्गानि। वर्जितविषयमविधार्यस्य वाच्यायोगवानि विस्मयस्थानं। अस्य साक्षिर्वृत्तिलिङ्गः न हृदि लग्न
वृत्तिप्रवृत्तं दृष्टं विघ्नाः तत्परमात्मकत्वानन्ययोनि मनि मति ज्ञानविघ्नशालिनि मनुष्यानन्द मानिनिः सर्वालम्बिनः
नवात्मक आनन्दहृदेश्वरेण च महात्मकत्वान् आनन्दहृदेश्वरस्य नवमहात्मकमुक्ताप्रुत्त्वं प्रपरिष्टाद्धृष्यमानोऽनन्यनिर्दृष्टं भवतो
नाः मतः कारणात्परानन्दपरमयोगं साक्षात् सर्वभावः १।१२। गुणत्व तः। शेषपदाप्यानन्दरसपरमधर्मकारणपसाधारणतया

शिव० ३२

योर्ईश्वरजीवयोः साधारणतया साधारण्यान्निस्थितः। अवस्थितः संबंधः शेषशेषीभावरूपः। यंतुरयोः समरसपरानंदरूप
योः समरससामरस्ययुक्ते परानंदः आनंदभैरवः परमानंदभैरवीरूपाविच्छक्तिः सकलोसमरस्यते परानंदपरवतयोः।
अनयोः प्रद्योतना। हे भगवति शंभोः त्वं शक्तिमिहिरमंडलरूपगं शरीरे अथ मितिशेषः। आनंदभैरवसत्कृतः महातः पानिल्वी
नस्य पिंडद्यावस्थोऽहतास्तोपणा। यद्वा यमनयोः। हे भगवति शक्तिमिहिरमंडलरूपगं शरीरे शंभोस्त्वमेव। स्वर्यं पंशलोनाद्यात्ल
नेवनैपनस्मृतो। उल्लोनाटकृतगुणकृमिस्यथावोद्धिश्रितिमितिरिति। अनेनभगवत्याः शंभुमलितोपलक्षते। हे भगवति निर्वाणानं
मनं घनवात्मानं मन्यअतः शषः शविरस्य यं समरसपरानंदपरयोः शंभुभुग्यायाम्नुभयसाधारणतयावस्थिताः। अन्ये तु मनसे
धयं। भवभैरवस्य नवात्मानं वव्यूहात्मकत्वात् नवव्यूहानाम। कालव्यूहः कुलव्यूहः नामव्यूहस्तथैव च। ज्ञानव्यूहस्तथा चित्त
व्यूहस्तानंदनंतरं। नादव्यूहस्तथा बिंदुव्यूहस्तानेदनंतरं। कालव्यूहस्तथा कुलव्यूहस्यादितिमेन नव। अस्यार्थः। कालव्यूह ना
मानेमषादिकल्पनात्मछिन्नः कालसमुद्भवः। स्वर्यं च द्यारपि कलोयभह्र कलनात्मा कालव्यूहः तनाजीवाणकः। कुलव्यूहनाम वर्णात्मा
दिरूपव्यूहः। नामव्यूहः संज्ञास्कंधः। ज्ञानव्यूहो नाम विज्ञानस्कंधः। भोगव्यूह इति मनतान्तरमे लिस्वरादिविधः सनोगावीभोगव्यूहो
र। सवैनोनोविकल्पः। चित्तआगानिर्विकल्पः। चित्तव्यूहो नाम अहंकारपंचस्कंधः अहंकारपंचकं अहंकारचित्तबुद्धिमहत्म

नोऽस्ति। नादः सूक्ष्मो नाम रागेच्छारूलिभयत्नस्कंधः। अनेन मातृकायाः परा पश्यंती मध्यमा वैखरीति चत्वारि रूपाणि। परा
रा नाम सांनरोहरूपा। अंतरंअंतःकरणे उन्मेषितस्वर्णमरिने रूपपस्याः सांनरोहरूपा गुह्यात्रस्थापामवह्नातये सभिसंधि
य भोक्ता कामकरणाभिधायो। यासा नरोहरूपा परमभरशी परानाम पश्यंती नाम रचैवस्यतत्त्वमते। यथोक्तं तत्रैव स्वच्छंदप
रमस्वात्माभिमाभि कात्मनावेक्षित कृतांधानां स्वप्नस्था अभुक्ता वस्तजयामभिरसमत पामृतीने सभ्रि संधिः। मध्यमानाम
परा पश्यंतोरूढा दुर्या वस्तात्मिका सा द्विविधा। या माद्विमूर्त्तिरूपा वेति। यामूर्त्तिः समष्टिः सूक्ष्मा व्यष्टिरूपा स्थूला वा सा
श्रीकंठः नामाऽपेक्षा रौद्री अंबिका एता स्वेतलः श्रीवकोनगनउ उमुख वर्त्तुनी न्यात्मिकायाः इच्छाज्ञानक्रियाशक्तिपराव
ति पंचाक्षरः। श्रीवकोनगना धामुखात्मान्यात्मिकायाः एतानिः शक्तिभिः नवमूर्त्यात्मिकाभिः अंगवसानवात्मके त
वनिमुन्मेते। यथोक्तं तत्रैव एका परात्मदृष्ट्या वा द्वियष्टिमातृस्वस्वात्मानेऽनेन यात्माऽज्ञानावधानां सामध्यमा द्विधा नाम्ना
द्विविधा हि मध्यमा सूक्ष्मा स्थूला रुलिः स्थिता सूक्ष्मा नवनादस्पर्शी स्थूलानन्तवर्गात्मानुभवत इत्यारव्याप्रकारणे अन्यं कार्ये
स्तत्वो यत्रलोनवर्णेन हि ऽन्यगलाहात्म्यंदतुरमुपञ्जीद्दष्टिविधि। अस्यार्थः। एका परनिमलरञ्जलमाछणानां सात्म्यरूपा
तदृष्ट्या पश्यंती अन्यन्तरगुणवैषम्यरूपा स्थूलः। मध्यमा यामाद्वि मूर्त्तिरूपा स्थूलाभिका धामाद्यः श्रीकंठः। वैदवत्सानस्यो

प्रमसंपुरत्वेनावस्थिताः। अनन्तरं सूक्ष्मादेः मध्यः सत्यः नवात्मशब्देन यच्चक्षीयते। समष्टिरूपा तु परा या मंत्रभेदाः तेन का
रणेन मातामातृकानवात्मत्रासामध्यमादिभानाम्नां नामाभ्यांदिरिधादि यस्मान्नतामध्यमा। सूक्ष्मारूढावर्तिते विभ्वं। स्व
भावस्वरूपमाह। स्थितेति। स्वर्णादिवर्णाया शुक्लादिवर्णायामध्यअवेक्ष्यान्नवनाद्दमयीनिनवनाभः अकवटतपयशक्षशकाः
नव परस्परं भिन्नअलीयाः। स्वरवर्गाः कवर्गचवर्गटवर्गतवर्गपवर्गयवर्गशवर्गक्षवर्गाणापरस्परंभिन्नत्वेनप्रतीयमानत्वं
नन्नन्नप्रमाणमाह। भूतलिप्यास्येति। भूतलिपिज्ञापिनत्यर्थः। आधाकारणमन्नेनिभाषासूक्ष्मरूपामध्यमाकारणस्थूलरूपायामध्यमाश्चः नवव
र्गाः। अन्यथा कार्यकारणयार्थेनस्तत्ताने केवयंत्तेनसूक्ष्मेवयस्थूलानस्थूलसूक्ष्मयारभ्रपिमशोदशगोनकापिहेतुरस्तीतिनान्यथैणाक्रंयन
स्तनोरितिनत्वप्रतिपादयति। नक्षिप्रदइति। हेतुहेतुमभावसम्बन्धंभीष्टमिस्यन्वयः। सर्वमंत्राणांसर्वेहेतुहेतुमद्भावेनिरकेणनास्तीत्यर्थः। अ
नत्तरमध्यमाविकृतैर्नामात्मसिद्धा। रागच्छादितप्रियनानांतरणत्वेनआगमेषुप्रसिद्धाः। मायापुरुषादिवामहेश्वरसदाशिवाः तत्त्वाद्दीनां
तत्वेनाः संगृहीताः। नः परापश्यंतीमध्यमावैखर्यः अपिशानन्तेनाः संगृहीतास्त्वनगुनव्यं। विदुषुनामपरचक्रसंघः। कालरुनाम
पंचाशत्कऽनांवर्णाभिकानांसंघः। ओंकरहानामत्रादिधः। एवंनवानांसहानांकाक्ष्म्यगपरूपणतेविप्रमाणमहेस्यागमत्वेपिद्वा
क्रमग्रमादात्म्याद्गेविप्यमपि। एवंभूतगस्वतावषयं। अपमारचः। आत्मसूहस्यात्नदात्मनगणस्याशंगत्वंकालरहाधिनाम
ग्यत्वमेवमावार्याणांनोविप्यमिति सर्वेषांसहाराणांभामयस्तस्वेनान्वयादकंधालरमूहस्यारछकसाहस्यंऽनामयस्वेनिरूपम

32

सौ० ल०

३५ नादस्यं तानन्य स्वबिंदुपूरतादन्या दस्य नादः कस्यचा देस्य नव व्यूहात्मकत्वे परमेश्वरस्यासिद्धमेव अतो न रविशब्दस्य गौर्भैरवया तानन्यथिमि
निकालमनरहस्यं। अनएव कोलः परमेश्वरानवात्मत्वं निमयरहस्यं। पद्धतः कोलः। नवव्यूहात्मकदेवः परानंदः परात्मकः। नवात्मा भैरवादृगा
भुक्तिमुक्तिप्रदायकः। परानंदा पराशक्तिः चिद्रूपानंदभैरवी। नयार्थः सामरस्यजगदुन्मपत्ते नदनिमित्तं मार्गमनवद्यं। अवशिष्टं नवाधार
ह इत्यादि निरूप्यते। अयमभावः। आनंदभैरवमहाभैरव्योः परानंदपरासंज्ञयोः नादात्म्यसिद्धे नवव्यूहात्मकत्वाद्रूपाः समाना। अतः शेषः
शेषीभावः आक्षेपिकः। यद्वा सर्वेष्विति उपषु आनंदभैरवस्य परानंदसंज्ञस्य चिद्रूपायाः महाभैरव्याश्च शेषत्वमुन्मपत्ते नहामेवी

मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परं।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानन्दाकारं शिवयुवति भावेन बिभृषे।३५।

प्रधानं प्रकृतिशब्दवाच्यमहाभैरवीतस्याः प्रधानत्वं शेषित्वं आनंदभैरवस्याप्रधानत्वं गुणभावः शेषत्वं। यद्वा सर्वेष्विति तेषु रागप्रकृतिन
न्मात्रा रस्थिता भैरव्यास्तन्मन्यं नन्दिनात्मभैरवस्य शेषित्वं भैरव्याः शेषत्वमिति।३५। मन इति। मनः मनस्तत्त्वं आज्ञाचक्रे स्थितं त्व
मेव व्योम आकाशतत्त्वं विशुद्धिचक्रे स्थितं त्वमेव मरुत् मरुत्तत्त्वं अनाहतनामकसंसर्विनवकोनान्तर्गतं असित्वमित्यर्थः। अयमेव
मरुत्सारथिः वायुसखः अग्नितत्त्वं स्वाधिष्ठानगतं असीति एवं वदृश्यपत्वं त्वमेवापः अमृतं मणिपूरान्तर्गतं त्वं त्वमेव भूमिः भूमि
मितत्त्वं मूलाधारगतं एवं रूपेण त्वयि परिणतायां परिणामं प्राप्तायां परं नहि किंचिदस्तीत्यर्थः। त्वमेव स्वात्मानं शिव० ३८

नंस्वस्वरूपंपरित्तमपितुं विश्वपरिणामत्वं कर्तुं विश्ववपुषा यपं स्वरूपं णविश्वाकारं विस्फुरत्तानंदैश्ववस्य आकारं शिववपुषामि
हरपत्नि युष्मत्तिःशब्दात्सर्वंनास्ति नत्वंहं कइति शेषः । तस्याः संबुद्धिः हे हरपत्नि भावेन विना विभ्रंशेन यच्चाविश्वाकारं आनंदा
कारं भलस्वरूपं शिवतत्त्वं शिववपुषीति भावेन शिवस्य प्रथमिति अन्यात्मस्याः भावः सत्त्वं । अन्नश्च परम्परानो हे भगवति मन त्वं
यामत्वं महदसि महत्ता रथ्यिरसि त्वमापत्ने भूमि त्वयि परिणतायां न हि परं त्वमेव स्वात्मानं विश्ववपुषा परिणमयितुं शि
ववपुषेति भावेन विश्वाकारं अविभ्रंश्य । मन स्त्वमिस्यादि भूमिरित्यंतेन परत्वात्मकः स्वरूपः परिणामो विकारस्तदुक्तः त्वयि
परिणतायामित्यनेन निर्विकारात्मकः कारणरूपत्वावस्थितिरितिशेषः । प्रकृत्या परिणामस्तदुक्तं । नहि परमित्यनेन अ
33 परिणाम्याः परिणामो नास्ति । अन एव स्वअपरिमितिहि त्यर्थः । यथोक्तं वसुः शत्रौ ऋतुः विमर्शनं ज्ञानं सर्वज्ञानानां मध्ये
येन विज्ञानमात्रेण बद्धो ध्यानेन निमज्जति । त्रिपुरा परमा शक्तिराद्या ज्ञाना महेश्वरी । स्थूलसूक्ष्मविभागेन त्रैलोक्योत्पत्तिमा
तृका । केवलज्ञानं निःशेषतत्त्वग्रामस्वरूपिणी । यस्यां परिणतायां तु न किंचित्परिशिष्यते । केवलज्ञानं निःशेषतत्त्वग्रा
मस्याद्यमर्थः । केवलीभूतः आत्मन्यारोपितः कारणात्मना यावस्थितः । यथा मृदि घट इव निःशेषं यथा सर्वतत्त्वानां प्रपंचनानां
ग्रामः स्वरूपः केवलीभूतनिःशेषतत्त्वग्रामः स एव स्वरूपं यस्याः सा कार्याणि कारणे उपसंहृत्य कारणात्मनावस्थितेत्यर्थः । सा त्वं

शा.टी.

५ यैवादीनां मतेन कारणकार्ययोस्तापि शक्तिरूपेण विद्यमानत्वादिति। एतदुक्तं भवति। अतः इतरमतेन प्रधानेन सह संगत्य कृत्वा प्रपानत्वादृशेषज्ञोना
स्ति शिवस्याज्ञावान्। तस्य परिणतिः पंचभूतात्मिका शक्तिः परिणता अतो मतः प्रस्तीनां शक्तिपरिणामः तत्त्वानां शक्तिपरिणामः। एवं प्रपंच
कार्यरूपं तत्त्वस्यामारोप्य कारणरूपेणावस्थितासा वाभारकुं इकुंडलिनीत्यभिधीयते इतः परं यद्वक्ष्यमाणं तत्र पिनतया धारमूले इत्यादि श्लोक
व्याख्यानावसरे निपुणतरमुपपादयिष्यामः।३५। तवेति। तव त्वदीये आज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं सूर्यचंद्रयोः कोट्याः अगणि
तकारि संख्याका इत्यर्थः। तासां द्युतीनां धरं नीति धरः। तं परं शंभुं परिमिलितसंज्ञाविद्याः। परिमिलितपार्श्वं परिमिलितौ पार्श्वौ दक्षिणवामौ रा

तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिमिलितपार्श्वं परचिता।
यमाराध्यन् भक्त्या रविशशिशुचीनामविषये निरालोके लोके निवसति हि भालोकभुवने।३६।

यस्य तं परचिता पराचासौ चिच्च पराचितिः तया परशक्त्या चितः संज्ञायो प्रसिद्धः। परचित्संपरिमिलितं परशिवं आराधयन् प्रसादयन् भक्त्या अन
तीत्या रविशशिशुचीनां सूर्यचंद्राग्नीनां अविषये अगोचरे अतएव निरालोके आलोकरहिते एकांते निवसति तत्सायुज्यं प्राप्य निवसतीति। हि
प्रसिद्धौ भालोके भुवने ज्योत्स्नामये लोके। अयमर्थः पद्यस्यान्ते। हे भवानि तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिचिता
परिमिलितपार्श्वं वंदे यमाराध्यन् भक्त्या रविशशिशुचीनामविषये निरालोके लोके भालोकभुवने निवसति। अत्रेदमनुसंधेयं शिव.
आज्ञाचक्रस्थमिलितवरार्द्धं तत्साधकस्य रुद्धिः स्वपञ्च। भवेति पद्मानन्दयाले ३५

एवमुपरमात्पूर्वं । अनयास्वाधिष्ठानेअग्निमीडे । अनाहतचक्रेसूर्यमीडे । आज्ञाचक्रेचंद्रमीडे इतिपूर्वमेवप्रतिपादितं ।
इहाग्निसूर्यचंद्रकिरणानामामूलात् षष्ठस्थानविसंस्थाकाः आधारप्रभृतिआज्ञाचक्रपर्यंतं विचरंति एतदपि पूर्वमेवप्रतिपादितं सम्प्र-
आज्ञाचक्रस्थितं शंभुं सहस्रकमलस्थितं श्रीचक्रात्मिकां निजकलापिपूर्वमेव समष्टिं निरूपितं ॥३६॥ विशुद्धाविति ।
विशुद्धौ विशुद्धिचक्रे नभस्तत्वात्मा शुद्धस्फटिकसंकाशं दंभसरहितं स्फटिकप्रभमिवस्वच्छं अतिनिर्मलं व्योमआज्ञाचक्रोद्गतात्मनतत्वादुद्य-
न्माकाशतत्वमित्यर्थः । न मामसाक्षात् मनः पर्यायवचनः । शिवं शिवतत्वं सेवे देवीं भगवतीं अपिशब्दः समुच्चये शिवसमानतया

विशुद्धौते शुद्धस्फटिकविशदं व्योमजनकं शिवं सेवे देवीमपि शिवसमानव्यवसितां ।
ययोः कांत्या यांत्याः शशिकिरणसारूप्यसरणेः विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥३७॥

व्यवसितां शिवेन समानः तुल्यः व्यवसितः आलापो यस्याः सा तां स्वयमपि शिवशब्दवाच्यस्यर्थः । ययोः शिवयोः कांत्या प्रभया यांत्याः शशिकि-
रणसारूप्यसरणेः चंद्रकिरणसदृशमार्गान्ताविधूतं नष्टान्तर्ध्वान्ता । विधूतमंतर्ध्वान्तं अज्ञानं यस्याः सा विलसति चकोरीव प्रकाशते
चकोरीव चकोरीविहंगीजगति निश्शोभा । अनेन पद्यार्थेन हे भगवति त्वं विशुद्धौ शुद्धस्फटिकविशदं व्योमजनकं शिवं शिवस-
मानव्यवसितां देवीमपि सेवे ययोः कांत्या यांत्याः शशिकिरणसारूप्यसरणेः कांत्याः सकाशात् जगति विधूतान्तर्ध्वान्ता चकोरीव वि-
सति । अयमर्थः । मम मन्यात्मनापानम् [illegible] विधूतान्तर्ध्वान्तः संतुष्टान्तरंगः सा

पकः लोक इति। अत्रेदमनुसंधेयं। विशुद्धिचक्रघ्रूमध्यपर्यंतं द्विनिरेवात्वोऽशतगलसिपुरुंद्दरीमध्वलीनोषाडशक्तेज्ञाना
ज्ञानात्मनाशक्तिरूपणानलचक्रस्थितयोः शिवयोः दृग्गमयस्य ज्ञानात्मकर्णेति। ३७। समिति। समुन्मीलत्संवित्कमलसंविदृवहान
मवकमलं तन्मकरंदः पुष्परसः सवासनावेकरस एवमरसवेकोरसदृस्यपदं विपानः। विशेषणं विशेष्यं जपकृतामितिपुर
रनिपातनात्तायदाः एकैश्चासौ रसिकः वेल्यकरसिकः पानाल मकरंदेन समासः। तं तथोक्तं। परमहंससरूपयोः शिवयोर्हंसत्वा
रोपणं संविदः कमलत्वारोपणाभिमतं अतः संविदः कमलत्वसिद्ध्येकैः शिविहरूपणमकरंदे न च आरोप्यमाणे कमलवणा सस

समुन्मीलत्संवित्कमलमकरंदैकरसिकं भजे हंसद्वंद्वं किमपि महतां मानसचरं।
यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव। ३८। मणिरिति

आरोप्यते अन्तरं एवमकरंदैकरसम्नीयासमासः। तं संवारंसद्वंद्वं किमपि अनिर्वाच्यं हंसयोर्द्वं मिथुनं सा भज्यं परिहंशनत्वे
शिवशक्तिसंपुटितमहतां योगीश्वराणां मानसचरं मानसशब्देन मानससरस्तमाराध्यमानससरसिहंसानामिव स्थितिवास्ते
यायदालापात यस्यहंसस्य द्वंद्वस्य आलापात् अष्टादशगुणितविद्यापरिणतिः अष्टादशविद्याः आलापरूपणपरिणता इत्यर्थः। यत्तहंम
सद्वंद्वं आदत्ते गृह्णाति दोषात्स्यपदोषपवमी। दोषमक्षगुण्यगुणगुणश्चगोगुणाभावस्य प्रथकपक्षकः गुणत्वेनहृषामेव आपिमानसोर्नं।
अखिलं समस्तं अद्भ्यः उदकेभ्यः पयः दुग्धमिव। [illegible] नमकरंदैकरसिकमहतांमान

सर्वं किमपि हंसद्वंद्वं भजे यदालापादष्टादशगुणितविद्यापरिणतिः यदादत्ते अखिलं गुणमद्भ्यः पयमिश्राद्धंसे । अत्रेदमनुसंधेयं । स
विन्कमलमनाहतनामकं भित्तिपूर्वोक्तं उपासकाः परमहंसमिथुनं संविन्कमलं उपासत इति समयमेके केचित्तु मतं । अत एव मह
नामानस सर्वं मिथुनं भगवत्याहं मनेन शिवशक्त्यात्मकरूपः परमेश्वरः शिवस्त्वात्मशक्त्यात्मस्वरूपिणी तु अनाहतचक्रे यथा उक्तरवर्तते इति
तीति । तथैवोक्तं भगवत्पादैः । सुषुप्तौ प्रस्थाने आत्मरूपः समय इह सेवानसमयानपाः सः शान्ता शान्तु रूपा अनेके निर्ण
इति इदमेवास्माकमभिमतं ॥ ३८ ॥ तवेति । तव स्वाधिष्ठानं स्वाधिष्ठानचक्रे हुतवहमग्निं तत्वमधिष्ठाय अभिसन्निरतं

तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं तमीडे संवर्तं जननि महतीं तां च समयां ।
यदालोके लोकान् दहति महति क्रोधकलिते दयार्द्रा यद्दृष्टिः शिशिरमुपचारं रचयति ॥ ३९ ॥

नवरतं तं प्रसिद्धं ईडे स्तुवे संवर्तं संवर्तनामकमग्निं जननि हे मातः महतीं महतीं च तां समयां नाम संवर्ताग्निरूपां समयां । समयापदस्याग्नेः
कल्पर्शनेन लोकान् भस्मीकृत्य दहति क्रोधकलिते इत्यर्थः दयार्द्रा यद्दृष्टिः शिशिरमुपचारं रचयति साहाय्येन ज्वालाशेषः । अत्रेदमनुसं
धेयं । स्वाधिष्ठानमग्निस्थानं तस्यात्मनि स्थानं तत्र प्रत्यनमग्निसंवर्ताग्निज्वालाकाराशक्तिरूपा तत्पार्श्वस्थिता शक्तिः संस्मर्तव्या । तत्र आलो
कः शिशिरं शीतलं उपचारं रचयति । अत्रैवेदं पद्यार्थः । हे जननि तव स्वाधिष्ठाने हुतवहं संवर्तमग्निमधिष्ठाय निरंतरा भीतं समयां
महतीं च ईडे यस्य महति क्रोधकलिते आलोके लोकान् दहति सति यत्तव दयार्द्रा दृष्टिः शिशिर × तस्य ताराधकेन जगति लोका

तानिरूपाणि पुनः प्रसन्नाया भगवत्या एव रूपांतरस्य दर्शिता पादप्रिय मणिपूरकचक्रे जलपादिना शिशिरमुपचारं रचयंतीति स्तुतिमाह न वस्तुम
इति ।४०। तडित्वमिति। तडित्वंतं। तडित् सौदामिनी सास्यास्तीति तडित्वं। शक्त्या तडिद्रूपया तिमिरपरिपंथिस्फुरणया तिमिरस्य मणिपूरक
नस्य मणिपूरचक्रे लाभिस्तोकस्य युक्तं पाके परिपंथि विरोधी स्फुरणं यस्याः सा स्फुरणा सौदामिनी तया युक्तं स्फुरितं इंद्रमपि मेघ
पस्य माधवषण्मुखस्य कं विशेषणं स्फुरंनानारत्नाभरणपरिणद्धेंद्रधनुषं। स्फुरंति चलंति नानारत्नानि तेभ्यः निर्मितानि आभरणानि
तैः परिणद्धं निर्मितं इंद्रस्य धनुर्येन तं। येन तं वा संज्ञायामिति नासमासः। नानाविधरत्नकांतिसंवलितसौदामिनी इंद्रचापभ्रांतिजनन

तडित्वंतं शक्त्या तिमिरपरिपंथिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं।
तव श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षंतं हरमिहिरतप्तं त्रिभुवनं ।४०।

यतीनमान् वर्षणेन निर्हेलं तं। यथोक्तं सिद्धस्पर्शिकायां। मणिपूरकं समानैः साधिष्ठानवर्णः सदाशिवः। अंबुदत्वेन अयोनिसौदा
मामिनी शिवा। तव रूपस्याः श्यामं श्यामवर्णं मेघं कमपि मनोवाचामगोचरं तत्पशुपतिकमपि रूपेण या निर्दिष्टमशक्यं मणिपूरकश
रणं। मणिपूर एव एकं शरणं गृहं यस्य तं। मणिशब्देन मणिधनुरुच्यते। मणिधनुःस्वरूपत्वात् भगवत्याः। तया पूर्यते इत्येकमणि
पूर इति रहस्यं। निषेवे नितरां सेवे। वर्षंतं हरमिहिरतप्तं हरस्य मिहिरः सूर्यः प्रतापः तेन ज्ञो अग्निरितियावत्। तेन तप्तं दग्ध
त्रिभुवनं। अयमत्र पद्यार्थः। हे भगवति तव मणिपूरकारणं हरमिहिरतिमिरपरिपंथिस्फुरणया शक्त्या तडित्वंतं स्फुरन्

नारलाभरणपरिणद्धं हृध्यत्तु धेयमां हरमिहिरनमं त्रिगुणं वज्रे तेजःपिमयं त्रिपदो अगोचरमत्तुसंभेयं।मणिपूरस्थाने
न्वेऽनलमुल्वन्नमितिभामितपादिनं प्राक्।नमस्कारः सूर्यकिरणाएवाग्निसंश्रि-नामेघनलमापुन्नोमनजलेनमाधिष्ठा
नाग्निदग्धं उगतच्छायपतीत्मागमरहस्यं २०।तवेमिनवम्भवताः आधारआधारस्य के मूले मूलाधारे इत्यर्थः।स
हसमयासमयसंज्ञयाःगस्यपरयाःआस्येरसेपरतामयं यस्याः सानयास्त्रीकर्तृकेन्द्रसेनङ्गंमिसुधनलनसमष्टिनल
रेऽभ्यांआनन्दभैरवान्दर्दरीभ्यांजगतः इदयाविधिंउमानिमुत्पन्नमुद्दिश्यकुर्नः इत्याह।इत्यर्थाति।दगधसलोकस्थ
तवाधारेमूलेसहसमयया।आस्यपरयानवात्मानंमन्ये नवरसमहाताण्डवनटं।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दययासनाथाभ्यांजज्ञेजनकजननीमज्जगदिदं।४१
पुनरुभाभ्यामितिमित्तंदयानयासनाथाभ्यांमीलिताभ्यांजज्ञेजनूकजननीमत्मातापितृमत्पघपेव: इदं इत्यर्थः।आस्यना
त्पसात्मानभातिपादानात्प्रकृतिपुरुषपर्यादर्शनजगदुत्पत्तिलीस्यन्दवावसानेमत्जगदुत्पत्तिरितिकोजादसिद्धान्तः।
अन्नेथंपदयोरुत्ताहेभगवतिनवम्रेआधारेलास्यपरयासहेममयासहनवरसमहाताण्डवनटं नवात्मानंमन्येउद
यविधिमुद्दिश्यउभाभ्यांदययासनाथाभ्यांइदंजगतजनकजननीमज्जगदा।अयंभावः।आधारस्वाधिष्ठानयोःलुप्तिमूले
कलातन्त्रकौलानामधिकारएवाससमयाराधनाभावेपिसमताजुसारणसहस्रकमलेनिषध्येवज्ञगवतिआधारस्वाधि

ष्ठानयोः सम्यगतिमहाभैरवीसमयापि तेनान्यत्र इति। अतो यद्भूमनुसंधेयं। आधारचक्रे त्रिकोणआधारं आधारे बिन्दुस्थितकुण्डलिनी इति प्रसिद्धं। अन्ये तो
न्तर्मते त्रिकोणमध्य बिन्दुस्थाने सत्यचबिन्दुस्थले सत्यः। अन्ये कौलाः त्रिकोणनि संबिंदुमध्ये दर्शिताः। त्रिकोणादिद्विविधः श्रीचक्रान्तर्गततन
न्यानि मध्ये च नियोजिताः सुहृदो ब्राह्मण्याः प्रत्यक्षयोनिश्च। श्रीचक्रगतं नयोनिमध्यगत योनि इति मपत्र ध्वजे पत्रं तल्लपाठादर्शित
ताः पूर्वकौलाः पूर्वं पतितरुण्याः प्रत्यक्षयोनिम् उत्तरकौलाः ऊर्ध्वयोनिं सम्यगयमबतानारमन्तशिखामाधारचक्रमेव पूज्यन्तत्र तिष्ठति
नाकुण्डलिनीशक्तिः कौलानुष्ठानं तस्याः त्रिकोणचक्रं कामिनि रहस्यं। एवं कुण्डलिनी शक्तिर्बिन्दुरूपिणी निद्रायमाना समस्या सर्व
इति निद्रासामर्थ्यानां सप्तमनभिज्ञाः कुण्डलिनीप्रबोधाय स्थानं न ध्यानं च मूलकं कौलानां। अनन्तवषणमुक्तेयः कौलाः इति पूर्वकाराः।
तत्र सुराद्यांसमधुमद्यादि द्रव्यैः समाराधनं समयाचारभ्रष्टास्तथाप्यधस्त्रिकोणस्थानं बिन्दुस्थानं मूलाधारपञ्चकं तत्त्वानां सम्भूयपतितं अधोमुखं त्रि
कोणं अधोमुखमेव पूज्यते। दिगम्बरभपणकादयस्तु लिङ्गयोनिपूजानां कुलाचार्यत्रिकोणं पूज्यन्तीति रहस्यं। अनन्तरं बैन्दवचक्रे पूजा तिन्
अवधिकमार्गत्वात् स्मरणार्हमपि नपठित इति तथापि निषिद्धत्वेन समयमतमार्गप्रदर्शनापयोगि कनन्यादिरूपनुगम्य समयमतानिषिद्ध
रणा। अथ समयमतं निरूपयते। त्रिकोणादिपञ्चचक्रमाधारादिषट्चक्रात्मनापरिणतं षट्त्रिंशतत्त्वगतं तत्तदधिष्ठितान्तःश्रीचक्रे त्रिकोण
बैन्दवस्थानमिति नाचलंप्रसिद्धं तन्मते त्रिकोणमयेन मूलकोणानिर्माणं त्रिकोणाद्यं च बिन्दुस्थानं सर्वमिति यत्तु क्षोणमचक्षुर्सहस्र
मस्तानगतं चन्द्रमण्डलमिति चन्द्रधामप्रवर्तितं। तत्पूजनं बैन्दवस्थानं सुधासिन्धुः सर्वपरिवृतपापरहितं तत्र क्षोणमध्ये बिन्दुस्थानं शि० ३८

मिति वा स्यपूजा तरुणी त्रिकोणपूजा च ह्यानंदय समयिनां सह सकमलेन समयायाः समयस्य च शंभोः पूजा। समयानाम शंभुना साम्यं
पंचविधं यातीति समया शंभुसहिता इआसह पंचविधं साम्यं यातीति समयत्वं अनयोः उभयोः समप्राधान्येन च साम्यमिति। तत्पंचविधं सा
म्यं यातीति अधिष्ठानसाम्यं अनुष्ठानसाम्यं अवस्थानसाम्यं रूपसाम्यं नामसाम्यं चेति पंचविधं समयायाः च प्रधानयोः शिवयोः। मूला
धारे इति अधिष्ठानसाम्यमुक्तं। उभयोराधारचक्रे स्याधिष्ठानत्वात्। अनुष्ठानसाम्यं अनन्तनर्तनीमनुगाढं हि इति सहनेन प्रतिपादितं
उमादेः कृत्यायाः आधिमन्माणत्वात्। अवस्थासाम्यं लास्यताण्डवप्रियाभ्यामवगतिप्रतिपादितं। लास्यताण्डवयोर्नृत्तभेदत्वमेव
रूपसाम्यं तु आरुणत्वमुभयोस्तत्र नारत्वेन प्रसिद्धं। जपाकुसुमकान्तिमधुरशोणितकायवन्तौ। जगतः पितरौ वंदेऽरुणाभौ रवीन्दुस्वान्न
विति। यद्धानवात्मानमितिरूपसाम्यं च प्रतिपादितमिति ध्येयं। एवं भैरवेति लभ्यते। यथा ताडितत्वेनामिसा नाडि
